M. T. B. COLLEGE, SURAT
*Manuscripts Library*

No. Ref.
Ser. 705

Title: Sishupala Vadha
Sarga 1

705

शिशुपालवधं. सर्ग. १.

Incomplete

| | |
|---|---|
| Shishupāla Vadha | : Title |
| Māgha | : Author |
| | : Editor |
| Sarga 1 | : Year, Vols. |
| | : Publisher |
| 705 | : Remarks |

 श्रीगणेशायनमः॥ इंदीवरदलश्याममिंदिरानंदकंदलं॥ वंदारुजनमंदारं वंदेहं य 
दुनंदनं॥१॥ दंतांचलेन धरणीतलमुन्नमय्य पातालकेलिषु धृतादिवराहलीलं॥
उल्लाघयत्वो फणफणाघृणीयमानक्रीडावदानमिभराजमुखं नमामः॥२॥ शारदाशा
रदांभोजवदनावदनांबुजे॥ सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात्॥३॥ वाणींका
णभुजीमजीगणदवाशासीच्चवैयासकीमंतस्तंत्रमरंस्तपन्नगगवीगुंफेषु चाजागरीत्॥
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां लोके भूद्यदुपज्ञमेव विदुषां सौ
जन्यजन्यं यशः॥४॥ मल्लीनाथकविः सोयं महोपाध्यायशब्दभाक्॥ विधत्ते माघका
व्यस्य व्याख्यां सर्वंकषाभिधां॥५॥ ये शब्दार्थपरीक्षणधियो ये वा गुणालंक्रियादक्षाः कौ
तुकिनो विदग्धमनसो ये च ध्वनेरध्वगाः॥ क्षुभ्यत्प्लावतरंगितेरससुधापूरेभिमर्शं १
तिये तेषामेव कृते करोमि विवृतिं माघस्य सर्वंकषां॥६॥ नेतास्मिन्यदुनंदनः स भग
वान्वीरः प्रधानो रसः शृंगारादिभिरंगवान्विजयते पूर्णा पुनर्वर्णना॥ इंद्रप्रस्थग

माद्युपायविषयश्चैद्यावसादः फलं धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात्॥७॥
इहान्वयमुखेनैव सर्वं व्याख्यायते मया॥ नामूलं लिख्यते किंचिन्नानपेक्षितमुच्य
ते॥८॥ अथ तत्रभवान् माघकविः काव्यं यशसेर्थकृते व्यवहारविदे॥ शिवेतर
क्षतये सद्यः परनिर्वृतये कांतासम्मिततयोपदेशयुजे॥ इत्याद्यालंकारिकवचनप्रा
माण्यात्॥ काव्यस्यानेकश्रेयःसाधनतां काव्यालापांश्च वर्जयेदिति निषेध
शास्त्रस्यासत्काव्यविषयतां च पश्यन्॥ शिशुपालवधाख्यं काव्यं चिकीर्षुः
श्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनताशी
र्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिसाशीशाघन्यतमस्य प्रबंधमुखलक्ष
णत्वाच्च काव्यफलवधबीजभूतं भगवतः कदनस्य नारददर्शनरूपं वस्त्वादौ
श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपाक्षिपति॥ ॥ श्रियः इति॥ ॥

मांघटि अत्रादौश्रीशब्दप्रयोगात्॥वर्णगणादिशुद्धिरप्युच्चयः॥तदुक्तं॥देवतावा स·१
२ काःशब्दाःयेचभद्रादिवाचकाः॥तेसर्वेनैवनिंद्याःस्युर्लिपितोगणतोपिचेति॥
श्रियःलक्ष्म्याःपतिःअनेनरूपासक्तायासमेतइतिसूचितं॥राघवत्वेभवत्सी
तारुक्मिणीकृष्णजन्मनीतिपुराणात्॥जगन्निवासोजगतामाधारःकुक्षि
स्थाखिलभुवनइतिभावः॥जगल्लोकंशासितुंदुष्टनिग्रहशिष्टानुग्रहाभ्यां
नियंतुं॥श्रीमतिलक्ष्मीयुक्तेवसुदेवसद्मनि॥वसुदेवरूपेणःकश्यपस्य
वेश्मनिधातुसंबंधेप्रसूयाःभूतार्थत्वंवसन्कृष्णरूपेणतिष्ठन्हरिर्वि
ष्णुरंबरात्अवतरंतंनिजसंदेशकथनार्थमितिभावः॥हिरण्यस्यगर्भो २
हिरण्यगर्भोब्रह्मातत्प्रभवत्वात्तस्यांगभुवंतनूजं॥अथवातस्यांगाद

वयवात्उत्संगाद्भवतीतिहिरण्यगर्भांगभूःतंमुनिंनारदमित्यर्थः॥उत्सं
गान्नारदोजज्ञेदक्षोंगुष्ठात्स्वयंभुवइतिभागवतात्॥ददर्शकदाचिदि
तिशेषः॥अत्राल्पीयसिवसुदेवसद्मनिसकलजगदाश्रयतयाम
हीयसोहरेराधेयकथनादधिकप्रभेदोःर्थालंकारः॥तदुक्तं॥आधारा
॥श्रियःपतिःश्रीमतिशासितुंजगज्जगन्निवासोवसुदेवस
॥द्मनि॥वसंददर्शावतरंतमंबराद्धिरण्यगर्भांगभुवंमुनिंहरिः॥१॥ तृ
धेययोरानुरूप्याभावेअधिकोमतइतिजगन्निवासस्यजगदेकदेशनिवा
सित्वमितिविरोधश्च॥तथालंकारसंकरादेःकेवलस्यासंभवात्साजगज्ज
गदितिसकृद्व्यंजनद्वयसंभवाच्चवृत्त्यनुप्रासभेदोशब्दालंकारोएषांचान्योन्यनै
क्ष्येणैकत्रसमावेशात्तिलतंदुलवत्संसृष्टिः॥सर्गेस्मिन्वंशस्थवृत्तं॥जतौ
तुवंशस्थमुदीरितंजराविति लक्षणात्॥१॥

तदानीं जनैर्विस्मयादीक्षितुं प्रवृत्तमित्याह ॥ गतमिति ॥ अविद्यमानौ ऊरू यस्य सः
अनूरुः सारथिर्यस्य तस्य अनूरुसारसारथेः सूर्यस्य गतं गतं गतिः भावे क्तः ति
रश्चीनं तिर्यग्भूतं विभाषांचेरदिक्स्त्रियामिति तिर्यक्शब्दाद्चसंतात्सा

द्विधाकृतात्मा किमयं दिवाकरो विधूमरोचिः किमयं हुताशनः ॥
गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ॥ २ ॥

ति यदिकात् स्वार्थे ख प्रत्ययः ॥ हविर्भुजोऽग्नेः ऊर्ध्वज्वलनं ऊर्ध्वस्फुरणं
प्रसिद्धं इदं तु सर्वतो विसारि धाम अधः ॥ २ ॥ 

पतति किमेतत् सूर्याग्निविलक्षणमदृष्टपूर्वकमिदं किंनामकं स्यादिति आ
कुलं विस्मयात्संभ्रांतं यथा तथा जनैरीक्षितं दृष्टं कृतं ॥ सकर्मकादप्यवि
वक्षिते कर्मणि भावे क्तः ॥ प्रसिद्धेरविवक्षात् कर्मणो कर्मिकाक्रिया इति व

पतत्यधो धाम विसारि सर्वतः किमे
तदित्याकुलमीक्षितं जनैः ॥ २ ॥

चनात् ॥ केचित् कर्मणि क्तांतं कृत्वा ईक्षितं मुनिं ददर्शेति पूर्वेण योजयंति ॥ अ
त्रोपमेयस्य मुनिधाम्नः सूर्याग्निभ्यामुपमानाभ्यां तद्धर्मभाविना अधःप्रसा
रणधर्मेण आधिक्यावर्णनात् व्यतिरेकः ॥ तदुक्तं ॥ काव्यप्रकाशे ॥ उपमानाद्यद
न्यस्य व्यतिरेकः स एव सः इव सः इति ॥ २ ॥

माघटि· अथभगवान्निरचैषीदित्याह॥ चयेति॥ पुनर्वस्तुतत्त्वावधारणसमर्थःसःह स·१
४ रिःपुराप्रथमंत्विषांचयइत्यवधारितंतेजःपुंजभावेननिश्चितंततःप्रत्यासन्ने
विभाविताविस्पष्टाःआकृतिसंस्थानंयस्यतस्यतंतथोक्तंअतएवशरी[illegible]

चयंस्त्विषामित्यवधारितंपुराततः
शरीरीतिविभा[illegible]ताकृतिं॥ ॥

रीचेतनइत्यवधारितंततोविभक्ताःविविक्ताःगृहीताअवयवाःमुखाद
योयस्यतंतथोक्तंअतएवपुमानित्यवधारितंअमुंआगच्छंतंव्यक्तिविशेषं॥ना
रदइत्यसावभिप्रायेणेतिपुंल्लिंगनिर्देशः॥क्रमात्सर्वोक्तसामान्यविशेषज्ञान ४
क्रमेणलोकदृष्ट्याचेदमुक्तं॥हरिस्तुसर्वंवेदैवेतितत्त्वंनारदइत्यबोधिनारदंबुबुधवा
निसर्थः॥१॥

नारदस्येत्युक्तेकर्मण्यपिनिपातेनेतिशब्देनाभिहितत्वान्नद्वितीया॥निनाद्युपसंख्यानस्यो
पलक्षणत्वात्॥यथाहवामनः॥निपातेनाभिहितेकर्मणिनकर्मविभक्तिःपरिग
णनस्यप्रायिकत्वादिति॥बुध्यतेःकर्त्तरिलुङ्दीपजनेत्यादिनाचिण॥चिणोलुगि

विभुर्विभक्तावयवंपुमानितिक्रमा
दमुंनारदइत्यबोधिसः॥२॥ ॥

तितस्यलुक्॥अत्रविभाविताकृतिंविभक्तावयवमित्यादिनाकृतिविभावनावय
वविभावनयोःपदार्थयोर्विशेषणगत्याशरीरित्वपुंस्त्वावधारणहेतुत्वेनोपन्या
सात्पदार्थहेतुकंकाव्यलिंगमलंकारः॥तदुक्तं॥हेतोर्वाक्यपदार्थत्वेकाव्यलिं
गमुदाहृतमितिलक्षणात्॥२॥ १॥

माघटि. ५ अथसप्तभिर्मुनिं विशिनष्टि ॥ नवानित्यादिना ॥ कीदृशममुं नवान् सद्यः संभृतसलि स.१
लान् अनितिनीलानितिपावत् ॥ बृहतः विपुलान् पयोधरान् मेघान् अधोअधः
मेघानां समीपादधःप्रदेशोल्लिखितमितिशेषः ॥ उपर्यध्यधसः सामीप्य इति द्विर्भावः ॥

नवानधोबृहतःपयोधरान्समू धौ
ढकर्पूरपरागपांडुरं ॥ ४ ॥

तद्योगेद्वितीया ॥ अभिसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ॥ द्वितीयाम्रेडितां
तेषु ततोऽन्यत्रापि दृश्यते इति वचनात् ॥ समूढः पुंजितः ॥ समूढः पुंजिते भुग्ने इति वि ५
श्वः ॥ कर्पूरस्य परागश्चूर्णः तद्वत्पांडुरं ॥ अतएव लक्षणं मेघसमीपावस्थानक्षणे
अत्यंतसंयोगे द्वितीया ॥ ४ ॥

क्षणेषुतांडवोत्सवेषु ॥ हिनिव्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्युभयत्रापि
अमरः ॥ उत्क्षिप्ता उपरिधारिता गजेंद्रस्य कृत्तिः चर्म येन तेन ॥ अजिनं चर्म कृत्तिः स्त्रीत्य
मरः ॥ भूत्या भस्मना सितेन ॥ भूतिर्भस्मनि संपदीत्यमरः ॥ शंभुना स्फुटा उपमा सादृश्यं

क्षणं क्षणोत्क्षिप्तगजेंद्रकृत्तिनास्फुटो
पमं भूतिसितेन शंभुना ॥ ४ ॥ ॥

यस्य तं स्फुटोपमं स्फुटं शंभूपममित्यर्थः ॥ सापेक्षत्वेपि गमकत्वात्समासः ॥ सदृश
पर्याययोरेवातुल्योपमाशब्दयोरतुल्योपमाभ्यामिति निषेधात् सदृशवाचिवेत
तीयादुः ॥ केचिद्दिमं श्लोकं चयनालिषामित्यतः प्राक् लिखित्वा व्याचक्षते तेवा पुंस्त्वाव
धारणात् प्राकृतेऽपि डमात्रस्य शंभुषमौचित्यं ॥ ४ ॥ ॥ ॥

दधानमिति ॥ अंभोरुहकेसरद्युतीः पद्मकिंजल्कप्रभाः पिशंगीरित्यर्थः ॥
जटाः दधानं ॥ स्वयं तु शरच्चंद्रमरीचिवद्रोचिर्यस्य तं धवलमित्यर्थः ॥ अ
त एव विपाकेन परिणामेन पिंगाः पिंगलाः तुहिनस्थलीरुहः तुहिनस्थ

दधानमंभोरुहकेसरद्युतीर्जटाः शरच्चंद्रमरीचिरोचिषं ॥ ॥
विपाकपिंगास्तुहिनस्थलीरुहो धराधरेंद्रं व्रततीततीरिव ॥ ५ ॥

ल्यां रोहंतीति तथोक्ताः ॥ व्रततीततीः लताव्यूहान् ॥ वल्ली तु व्रततीर्लतेत्य ६
मरः ॥ ताः दधानं धराधरेंद्रं हिमवान् तुहिनस्थलीति लिंगात् अन्य
थानारोपमानत्वासंभवाच्च तमिव स्थितं ॥ ५ ॥ १ ॥

पिशंगेति ॥ पुनः मुंजस्तृणविशेषस्तन्मयी मेखला मौंजी पिशंग्या मौंज्या
युज्यत इति पिशंगमौंजियुक् तं ॥ सत्सूद्विषेत्यादिना क्विप् ॥ स्त्रियाः पुंवदि
त्यादिना पिशंगीशब्दस्य पुंवद्भावः अर्जुनछविं धवलकांतिं ॥ वलक्षो धवलो ॰

पिशंगमौंजीयुजमर्जुनच्छविं वसानमेणाजिनमंजनद्युति ॥ सुवर्ण
सूत्राकलिताधरांबरां विडंबयंतं शितिवाससस्तनुं ॥ ६ ॥ ॥

र्जुन इत्यमरः ॥ अंजनद्युति अंजनवर्णं एणाजिनं कृष्णमृगचर्म वसानं आ
च्छादयंतं ॥ वस आच्छादन इति धातोः शानच् ॥ सुवर्णसूत्रेण कनकमेखल
या आकलितं बद्धं अधरांबरं अंतरीयं यस्यास्तां शितिवाससा नीलांबरस्य प
रामस्य तनुं विडंबयंतं तमनुकुर्वाणमित्यर्थः ॥ अथश्चउपमा ॥ ६ ॥ ॥

विहंगेति॥पुनः विहंगराजांगरुहैरिव॥गरुत्मल्लोमतुल्यैः कुतः आयतैः दीर्घैः
हिरण्यस्य विकारो हिरण्मयी दांडिनायनादिना मयटि यलोपनिपातः॥तस्याम्
अर्चिरुहाः रुहाः इगुपधलक्षणः कः प्रत्ययः॥तासां वल्लीनां तंतुभिः तंतुतुल्यैः सू

विहंगराजांगरुहैरिवायतैर्हिरण्मयोर्वीरुहवल्लितंतुभिः॥कृतोप
वीतं हिमशुभ्रमुच्चकैर्घनं घनांते तडितां गुणैरिव॥ ७ ॥ ॥

क्ष्मावयवैः उपादानगुणात् हिरण्मयैः कृतोपवीतं शोभार्थं कल्पितयज्ञसूत्रं॥ ।श्री ७
स्वयं हिमशुभ्रं॥अत एव घनांते शरदि तडितां गुणैः रूपलक्षितं उच्चैरेव
उच्चकैः उन्नतं घनं मेघमिव स्थितं॥ ७ ॥ ५ ॥ ५ ॥ ५ ॥

निसर्गेति॥पुनः निसर्गात् स्वभावादेव चित्राणि कृष्णसाराणि उज्ज्वलानि भास्वरा
णि लोमानि यस्य तेन लसन्त्यो बिसच्छेदाः मृणालखंडास्तद्वत्सितैः अंगैः वपुषि
संगिना सक्तेन चारुणा च मृगचर्मणा मृगत्वचा कुथेन पृष्ठास्तरणेन प्रवे

निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसितांगसंगिना॥
चकासतं चारुचमूरुचर्मणा कुथेन नागेंद्रमिवेंद्रवाहनं॥ ८ ॥ ॥

ण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोरित्यमरः॥इंद्रवाहनं नागेंद्रं ऐरावतमिव नं
इंद्रस्य वाहनमिति स्वस्वामिभावमात्रस्य विवक्षितत्वात् न्नाहनमाहितादिति ण
त्वं न यथा हवामनः॥नागेंद्रवाहनशब्दे नत्वमहितत्वस्याविवक्षितत्वात् चकासतं दी
प्यमानं॥चकासतः शतरि नाभ्यस्ताच्छतुरिति नुमभावः जक्षित्यादयः षट् अभ्यस्तसंज्ञाः॥ ८ ॥

मा॰घ॰टी अजस्रमिति॥पुनरजस्रंप्राचुर्येणास्फालितास्ताडिताःस्वरपरिक्षार्थंखलुकरांगुष्ठेन
॥८॥ तंत्रीताडनप्रसिद्धं॥तेषांवल्लकीगुणीनांवीणातंत्रीणांक्षतेनसंघर्षणेनउज्वलैरंगुष्ठन
खांशुभिर्भिन्नयामिश्रितयातन्मागरक्तायेत्यर्थः॥अतएवपुरःपुरोभागेप्रवालैर्विद्रुमैःमुक्ता
र्थोविद्रुमःपुंसिप्रवालंपुनपुंसकमित्यमरः॥पूरिताऽर्धयेवस्थितयाअधःस्फटिकाक्षमाला

अजस्रमास्फालितवल्लकीगुणक्षतोज्वलांगुष्ठनखांशुभिन्नया॥
पुरःप्रवालैरिवपूरितार्धयाविभांतमच्छस्फटिकाक्षमालया॥९॥

याअधःस्फटिकानामक्षमालयाजपमालयेत्यर्थः॥तथाप्रसिद्धःस्फटिकग्रहणान्मुनेर्मोक्षा
र्थित्वंव्यज्यतेस्फटिकोमोक्षदः॥परमितिमोक्षार्थिनांस्मृतः॥स्फटिकाक्षमालइत्यभिधानात्
विभांतंभासमानंभातेः॥शतृप्रत्ययः॥अत्रनखांशुभिन्नयेतिस्वगुणत्यागेनान्यगुण ॥८॥
स्वीकारलक्षणस्तद्गुणालंकारउक्तः॥तद्गुणःस्वगुणत्यागादन्योत्कृष्टगुणाहृतिरिति
लक्षणात्॥तदुत्थापितायेयंप्रवालपूरितार्धत्वोत्प्रेक्षेत्यनयोरंगांगिभावेनसंकरः॥९॥ शिव॥

रणद्भिरिति॥पुनःनभस्वतंवायोराघट्टनयाआघातेनप्रथगमंकीलैरणद्भिरनुरणनात्म
कोत्पद्यमानैरित्यर्थः॥श्रुत्यारभ्यमनुरणनंस्वरइतिलक्षणात्॥तदुक्तंरत्नाकरे॥श्रु
त्यनंतरभावीयःस्निग्धोनुरणनात्मकः॥स्वतोरंजयतिश्रोतुश्चित्तंसस्वरउच्यतेइ
ति॥श्रुतिर्नामस्वरारंभकावयवःशब्दविशेषः॥तदुक्तं॥प्रथमश्रवणाच्छब्दःश्रूय

रणद्भिराघट्टनयानभस्वतःपृथ
ग्विभिन्नश्रुतिमंडलैःस्वरैः॥ ॥

तेह्रस्वमात्रतः॥साश्रुतिःसंपारिज्ञेयास्वरारंभकावयवलक्षणा॥इति॥विभिन्नानि
प्रतिनियतसंख्ययाव्यवच्छिन्नानिश्रुतिनांमंडलानिसमूहायेषांतैःविभिन्नश्रुतिमंडलैः
श्रुतिसंख्यानियमेदेविलःचतुश्चतुश्चतुश्चैवषड्जमध्यमपंचमाः॥द्वेद्वेनिषादगांधारौ॥
त्रिस्त्रिऋषभधैवतौ॥स्वराःषडादयःसप्तोक्तलक्षणाः॥तदुक्तं॥श्रुतिभ्यःस्युःस्वराःख

माघटि॰ डूर्षतां गांधारमध्यमाः॥ पंचमो धैवतश्चाथ निषाद इति सप्त ते॥ तेषां संज्ञाः॥ सगिम स॰१
६ पधनीति इत्यपरा भता इति तैः स्वरैः स्फुटीनं विशेषाणां षड्जाद्यपरनामकानां स्वरसप्त
योग्रामधानभेदानां त्रयाणां मूर्छनाः स्वारारोहावरोहक्रमने दोषस्यास्यां॥
महतीति जवीणां विश्वावसोस्तु बृहती तुंबरोस्तु कहती तुंबरोस्तु कलीवती॥ म

स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुः॥१०॥

हतीनारदस्यस्यात॥ सरस्वत्यास्तु कच्छपीति वैजयंती॥ मुहुर्मुहुरवेक्षमाणं॥
तंत्रीयोजनाभेदक्षणमहिम्ना पुरुषप्रयत्नमंतरेणैवाभिसंवादं ध्वनंतीति कौ
तुकादनुसंदधानमित्यर्थः॥ अथग्रामलक्षणं यथा कुटुंबिनः सर्वेप्येकीभू ९
नामवंतिहि॥ तथा स्वराणां संदोहो ग्राम इत्यभिधीयते॥ षड्ग्रामो भवेदादौ मध्य

मग्राम एव च॥ गांधारग्राम इत्येतद्ग्रामत्रयमुदाहृतं॥ तथा॥ नंदावर्तोद्यधीभूतः
सुभद्रो ग्रामकास्त्रयः॥ षड्जमध्यमगांधारास्त्रयाणां जन्महेतव इति॥ मूर्छनालक्षणं॥
क्रमात्स्वराणां सप्तानामारोहश्चावरोहणं॥ सा मूर्छेत्युच्यते ग्रामस्था एताः सप्तस
प्त च॥ ग्रामत्रयेपि प्रत्येकं सप्तमूर्छा इत्येकविंशति मूर्छा भवंति॥ तन्नामानि तु नान
पेक्षितमुच्यते इति प्रतिज्ञाभयान्नाख्यात इति सर्वमवदातं॥ अत्र पुंव्यापारमंतरे
ण स्वराद्याविर्भावो नभस्वत्कोपि लोकातिक्रांतकोपकारित्यसौ एवातीचायो वीणायाः
प्रतीयते॥ तेन सह स्वतः प्रसिधावायस्याभेदेनाध्यवसितत्वात्तन्मूलातिरलंकारः॥
सा च महत्याः पुंव्यापारं विना मूर्छनघसंबंधे संबंधाभिधानात् असंबंधरूपा तया
च पुंव्यापाराख्यरूपकारणं विनापि मूर्छनादिकार्योत्पत्तिनिघातनाद्विभावनाप्युते
इति अलंवलरेण अलंकारध्वनिरिति संपेक्षः॥१०॥ व्रजौति॥ अनीद्रिया इति य
मतिक्रांतदिवादेखाकालस्वरूपानापि प्रकृष्टा इत्यर्थः॥ असादयः क्रांताद्यर्थे॥

माघटि· निरूप्येति॥ अतींद्रियाइतियमतिक्रांतद्दिवादेशकालस्वरूपात्तुविप्रकृष्टाइत्यर्थः॥ स·१
१० असादयः क्रांताद्यर्थेद्वितीययेतिसमासः॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासे
लुपरत्तल्लिंगताप्रतिषेधोवक्तव्यइतिविशेष्यलिंगत्वंतेषांज्ञानंतस्यनिधिसवा
र्थदृष्टेत्यर्थः॥ समुनिः कृतानतीन्कृतप्रणामान्अनुव्रजतः अनुगच्छतः नभसि

निवर्त्यसोनुव्रजतः कृतानतीनतींद्रियज्ञाननिधिर्नभःसदः॥ समा
सदत्सादितदैत्यसंपदः पदंमहर्द्धेरालयचारुचक्रिणः॥ ११॥ ॥

सीदंतीतिनभःसुरानसत्सद्विषेत्यादिनाक्विप्॥ निवर्त्यप्रतिप्रयास्यासादिता
विनाशिताः दैत्यसंपदोयेनतस्यचक्रिणोहरेर्महर्द्धेस्तमालयभवनंतदेवारूपदं १०
स्थानंसमाससदत्प्रायत्॥ सीदतेर्लुङ्॥ पुषादित्वादङ्॥ अत्रनतीनतीपदपदमिति
द्वयोर्व्यंजनयुग्मयोरसकृदावृत्त्याछेकानुप्रासः॥ अन्यत्रवृत्त्यनुप्रासइत्यनयोःसंसृष्टिः॥ ११॥

पततीति॥ पतन्यः पतंगः सूर्यः सप्रतिमाउपमानंयस्यसः॥ पतंगःपक्षिसूर्ययोरित्यर्थः॥
तपोनिधिर्सनिरस्यहरेःपुरोभुविपुरःप्रदेशेतितयावत्॥ नव्यलीयतनातिष्ठत्॥ लिङ्गता
वितिधातोर्दिवादिकात्कर्त्तरिलुङ्॥ तावदच्युतोगिरेःशैलात्॥ तडितोःस्यसंतीतितडि
त्वान्॥ मेघइव॥ मादुपधायाश्चमतोर्वेयवादिभ्यइतिमतुपोमकारस्यवकारः तसौमत्व
र्थेइतिभसंज्ञामेकसंज्ञायामेकसंज्ञाधिकारेणपदत्वान्नजश्त्वं॥ उच्चैरुन्नतात्पीठादुज्

पतत्पतंगप्रतिमस्तपोनिधिःपुरोस्ययावन्नभुविव्यलीयत॥ गिरेस्तडि
त्वानिवतावदुच्चकैर्जवेनपीठादुदतिष्ठदच्युतः॥ १२॥ ॥

वेनोदतिष्ठत्॥ मुनिचरणस्पर्शस्पर्शात्प्रायेवस्वयमुत्थितवान्॥ ऊर्ध्वंप्राणाह्युत्क्रामंति
यूनःस्थविरआयते॥ प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यते॥ इतिशास्त्रमनुस्मरन्नि
तिभावः॥ उदोनूर्ध्वकर्मणीतिनियमादूर्ध्वकर्मणिनात्मनेपदं॥ पतत्पतंगइत्यत्रपतं
गस्यापतनासंभवादियमभूतोपमेत्याचार्यदंडिप्रभृतयोबभणुः॥ अतएवाप्रसिद्धस्यो

पगानत्वायोगाद्रुमश्लेषेसाधुनिकालंकारिकालंकारिकाःवर्वर्णयंति॥१२॥ ७ ॥ 
अथेति॥अथाच्युताभ्युत्थानानंतरंधातुःसुतेननारदेनप्रयत्नोन्नमितास्तथापिखुनिपा
द्न्यासभाराद्दानमतत्ःफणायेषांतैःफणिनांगणैःसमूहैरधोधःप्रदेशेकथंचिद्धृतेव्या
पितेभुवस्तलेनुदृष्टेअनिदेवकीसुतंलक्षणेनाभिप्रतिअभिमुख्यइत्यर्थभावः॥च

अथप्रयत्नोन्नमितानमत्फणैर्धृतेकथंचित्फणिनांगणैरधः॥
न्यधायिषातामभिदेवकीसुतंसुतेनधातुश्चरणौभुवस्तले॥१३॥

रणौन्यधायिषातांनिहितौ॥दधातेकर्मणिलुङ्॥स्यसिचसीयुडित्यादिनाचिण्
वदिडितियुक्॥अत्रफणानामुन्नमनासंबंधेःमुनिगौरवायतत्संबंधाभि ११
धानादतिशयोक्तिभेदः॥ १३ ॥तमर्घ्यमिति॥आदिःपूर्वःपुरुषःपुराणपुरुषः॥
अन्येषामपिदृश्यतेवाइतिदीर्घः॥सःकृष्णः॥अर्घंपूजांअर्हतीअर्घ्यः॥दंडादिभ्योय

इतियत्प्रत्ययः॥तन्नारदअर्घार्थंपूजार्थंद्रव्यंअर्घ्यं॥पादार्घाभ्यांचेतियत्प्रत्ययः॥
मूल्येपूजाविधावर्घःषट्तुत्रिष्वर्घ्यमर्घार्हमितिचामरः॥अर्घ्यमादिर्यस्यास्तयाअ
र्घ्यादिकयाशेषाद्विभाषेतिकःसपर्ययापूजया॥पूजानमस्यापचितिसपर्यार्चार्ह
णाःसमाइत्यमरः॥साधुसम्यक्पर्यपूपुजत्॥परिपूजितवान्॥णौचङ्युपधायाह्रस्वः॥युक्तं

२ तमर्घ्यमर्घ्यादिकयादिपूरुषःसपर्ययासाधुसपर्यपूपुजत्॥ ७ ॥ ॥
गृहानुपैतुंप्रणयादभीप्सवोभवंतिनापुण्यकृतांमनीषिणः॥१४॥

चैतदित्यर्थांतरंन्यस्यतिगृहानिति॥मनसःईषिणःसंतःपृषोदरादित्वात्साधुः॥अ
पुण्यकृतांपुण्यमकृतवतांसुकर्मपापमंत्रपुण्येषुकृञइतिक्विप्॥गृहान्
प्रणयादुपैतुंअभीप्सवःप्राप्तुमिच्छवः॥आप्नोतेःसनंतादुप्रत्ययः॥आपज्ञप्यृधामी
तीकारः॥नभवंति॥किंतुपुण्यकृतामेव॥अतःकृष्णलभ्याःसंतःपूजाइत्यर्थः॥ १४ ॥

माघ.टि. नयावदिति॥ उच्छ्रितावेतौ मुनिकृष्णौ जनस्तुषारांजनयोः पर्वताविव यावन्नो स.१
१२ दपश्यत् नो प्रेक्षितवान्॥ तावत्॥ चिरं भवृश्चिरं तनः पुराणो मुनिः कृष्णः पुराकि
ल भगवान् बलकिलारण्ये नागपणा यतारेणतपसि स्थितवानिति पुराणात्॥

नयावदेतावुदपश्यदुत्थितौ जनस्तुषारांजनपर्वताविव॥ स्वह
स्तदत्ते मुनिमासने मुनिश्चिरंतनस्तावदभिन्यवीविशत्॥१५॥

सायंचिरं प्राह्णाद्यादिना घुलप्रत्ययः॥ नुर्गागमश्च॥ स्वहस्तेन दत्ते आसने मु
निं नारदं अभीन्यवीविशत्॥ स्वाभिमुख्ये नोपवेशितवान्॥ विशतेर्णौ चिङ्॥१५॥ १२
॥ महामहेति॥ महत्या महानीलशिलायाः सिंहलद्वीपसंभवेंद्रनीलोत्पलस्य रुगि
व रुक् यस्य इत्युपमालंकारः सिंहलस्याकूरोद्भूता महानीलास्ते स्मृता इति

भगस्य॥ कंसकृषो हरेः पुरो अग्रे उच्चकैः उन्नते विष्टरे आसने॥ वृक्षासनयोर्विष्टर इति
षत्वं निषेदितवान्॥ उपविष्टवान्॥ भाषायां सदवसश्रुव इति क्वसु॥ समुनिः अभि
सायंकालाभिमुख्यं अव्ययीभावः॥ सायंकालस्य काष्ठां तत्र छोपमानत्वं श्रितउद

महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे॥ श्रि
तोदयाद्रेरभिसायमुच्चकैरचूचुरच्चंद्रमसोभिरामता॥ १६॥

याद्रियेन तस्य चंद्रमसोभिरामतां शोभामचूचुरत् चोरितवान्॥ प्राप्तवानित्यर्थः
चुरस्तेयेणिश्रिद्रुद्रुत्यादिना चङ्॥ अत्रान्यस्यान्यधर्मसंबंधासंभवाच्चंद्रमसोभिरा
मतामिवोप[illegible]न्यपपर्यवसानादसंभवद्वस्तुसंबंधरूपो निदर्शनाभेदः॥ सा चो
[illegible]कोपमया अंगांगिभावेन संकीर्यते॥ १६॥ ॥ ॥

विधायेति॥ यज्वा तु विधिवदिष्टवान्तः॥ यज्वा तु विधिनेष्टवानित्यमरः॥ सुयुजो
ङ्वनिप्॥ तेषां प्रियः हरिः प्रसेदुषः प्रसन्नस्य॥ सदेघसुरीति उक्तः॥ तस्य मुनेरपचि
तिं पूजां॥ पूजा नमस्यापचितिः पूजेत्यमरः॥ विधाय प्रकामं अत्यंतं अप्रीयत प्री
तोभवत्॥ प्रीङ् प्रीणने देवादिकात्कर्तरि लङ्॥ मुनिपूजायाः प्रीतिहेतुत्वं अर्थांतरं

विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः॥ ग्रही
तुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितांतमर्थिनः॥१७॥ सा॥ व॥

न्यस्यति॥ महानुभावाः महानुभावा महात्मानः आर्यान् पूज्यान् परिचर्यया मुहुः
ग्रहीतुं वशीकर्तुं॥ ग्रहोलिटि दीर्घश्च॥ नितांतं अर्थिनोभिलाषवंतो हि॥ अर्थे तम
र्थोभिलाष सत्त एषामस्तीति मत्वर्थीयः अत इनिठनाविति इति प्रत्ययो न तु णि ॥१३॥
निः अर्थ लृहृ ते स्तघित वृत्ति बलीयस्येति भाष्ये॥१७॥ ॥ ॥ ॥ ॥

अशेषेति॥ अशेषतीर्थेभ्यः उपहृतास्तथा कमंडलोः पाणौ निधाय कमंडलो
रुदकपात्रान् उपहृतस्य पाणौ निधाय इत्यर्थः॥ भुवस्तरणात्मंत्रीत्यादिवत् वा कुसुलात्
पवतीत्यादिवत् त्रियांतरापेक्षस्त्क्रियापेक्षया कमंडलोरपादत्वं॥ अस्त्री कमंड

अशेषतीर्थोपहृताः कमंडलोर्निधाय पाणौ मुनिना मुदीरिताः॥
अघोघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः॥१८॥

लुः कुंडी समरः॥ ऋषिणाभ्युदीरिताः॥ क्षिप्ताः अत एवाघौघानां विध्वंसविना
शकारणे पटीयसीः॥ समर्थतराः पटुशब्दादीयसुनि उगितश्चेति ङीप्॥ आपो
जलानि हरिः नतेन मूर्ध्ना अग्रहीत् स्वीकृतवान्॥ ग्रहेर्लुङ्॥१८॥ ४॥

माघटि·
१४

स·१

सकांचनेति॥नवांबुदश्यामतनुःमहर्षिर्मुनेरनुज्ञयाकांचनेकांचनविकारे॥चेत्कारि
कोःएरप्रत्ययः॥यत्रासनेस्यविवीक्षतउपविष्टवान्॥लुङि·निर्विशआत्मनेपदं॥रा
लङ्गुपदादनिष्टकाः॥तदासनंतदाद्यर्थुपवेशनसमये॥जंबूःनीलफलोवृक्षविशे

सकांचनेयत्रमुनेरनुज्ञयानवांबुदश्यामतनुर्न्यविक्षत॥जिगाय
जंबूजनिताश्रियःश्रियंसुमेरुशृंगस्यतदातदासनं॥ १९ ॥ ॥

षः॥जंबूःसुरभिपत्रावराजजंबूर्महाफला॥इत्यभिधानरत्नमालायां॥तयाजनि
ताश्रीर्यस्यतस्य॥तथोक्तस्यभाषितपुंसकत्वात्पक्षेपुंवद्भावाभावःसुमेरोःशृंग १४
स्यश्रियंजिगाय॥तदद्भाविसर्थःसन्लिटोर्जेइतिकुत्वं॥उपमानानुप्रासयोःसं
सृष्टिः॥१९॥

सतप्तेति॥तप्तेचुटूपाकशोधितंतकार्तस्वरंरुक्मंकार्तस्वरजांबूनदमष्टापदोःस्त्रिया
मित्यमरः॥तद्वद्भास्वरंदीप्यमानमंबरंयस्यसपीतांबरइत्यर्थः॥कठोरताराधिप
स्यपूर्णस्यलांछनस्यछविरिवछविर्यस्यसः॥इत्युपमानपूर्वपदोबहुव्रीहिरुत्तरप

सतप्तकार्तस्वरभास्वरांबरःकठोरताराधिपलांछनछविः॥विदि
द्युतेवाडवजातवेदसःशिखाभिराश्लिष्टइवांभसांनिधिः॥२०॥

दलोपश्च॥सहरिर्वाडवजातवेदसोवडवाग्नेःशिखाभिर्ज्वालाभिराश्लिष्टअंभ
सांनिधिरिवविदिद्युते[illegible]भासे॥२०॥रथांगेति॥रथांगंचक्रंपाणौयस्यतस्यह
रेःप्रहरणार्थेभ्यःपरेनिष्ठासप्तम्यौभवतइतिपाणेःपरनिपातः॥रोचिषांपटलेन
संवलिताःमीलिताःऋषिविशेषेनक्तंरात्रौसप्तम्यर्थेऽव्ययं॥तदोश्चलतांपलाशानां

*स्त्रीवरुश्शोल्लाघाइतिनियमन॥प्रफुल्लमित्येवं

माघटि० पत्राणामंतराणिविवराणिगोचरआश्रयोयेषांतेतुषारामूर्त्तिर्यस्यतस्येशोरंशाइवविरे स०१

१५ जिरेचकासिरे॥२१॥प्रफुल्लेति॥प्रफुल्लतीतिप्रफुल्लं॥फुल्लविकसनेइतिधातोःप

चाद्यजंतंफलेर्निष्ठायां॥अनुपसर्गाःफुल्लेतिक्षीरस्वामी॥तापिच्छस्यतमालस्यपु

र्फंताःपिछं॥फलेलुगितिलघितेलुक्॥द्विहीनंप्रसवेसर्वमितिनपुंसकत्वं॥कालस्कंधस्त

मालःस्यात्तापिछोपीत्यमरःतेननसदृशः॥प्रफुल्लतापिछनिभैः॥नित्यसमासत्वादस्वपद

रथांगपाणेःपटलेनरोचिषामृषित्विषःसंवलिताविरेजिरे॥चलत्पलाशांतरगोचरा

स्तरोस्तुषारमूर्तेरिवनक्तमंशवः॥२१॥प्रफुल्लतापिछनिभैरभीशुभिःशुभैश्च

सप्तछदपांसुपांडुभिः॥परस्परेणछुरितामलछवीतदेकवर्णाविवतौबभूवतुः॥२२॥

विग्रहः॥अतएवसुहृत्तरपदत्वमित्निभसंकाशनीकाशप्रतीकाशोपमादयइत्यमरः॥ १५

सप्तछदाःसप्तपर्णानिपर्वसुयस्येतिसप्तछदोवृक्षविशेषःसप्तछदोविशालत्वकूशार

दोविषमछदइत्यमरः॥संख्याशब्दस्यवृत्तिविषयेविप्सार्थत्वंसप्तपर्णादिवदित्युक्तंभा

ष्यशेषं॥तापिछवत्तस्यपुष्पाणिसप्तछदानि॥तेषांपांशुवत्पांडुभिःशुभैःशुभैरभिशुभि

रन्योन्यरश्मिभिःअभीशुःप्रग्रहरश्मावितिशाश्वतः॥परस्परेणछुरितेरूषितेअमलेछ

वीअन्योन्यकांतीययोस्तौ॥छव्योरभीशुनामवयवावयविभावन्देदेनिर्देशः॥तौहरि

नारदौतदाएकवर्णाविवबभूवतुः॥उभयप्रभामेलनादुभयोरपिसर्वांगीणोगंगायमुनासं

गमइवस्फटिकेंद्रनीलमणिप्रभामेलनप्रायःकश्चिदेकोवर्णःप्रादुर्बभुव॥तन्निमित्ताचे

युगांतकालंप्रतिसंहृतात्मनोजगंतियस्यांसविकाशमासत॥तनौ

ममुस्तत्रनकैटभद्विषस्तपोधनाभ्यागमसंभवामुदः॥२३॥ ॥

यमनयोरेकवर्णत्वोत्प्रेक्षा॥२२॥युगांगेति॥युगांतकालेप्रतिसंहृताआत्मन्युपसंहृता

आत्मानोजीवायेनतस्यकैटभद्विषःहरेर्यस्यांतनौजगंतिसविकाशंसविस्तरंआसतआ

सतअतिष्ठत॥आसउपवेशनेलंङ्॥तत्रतनेदृष्टतपोधनाभ्यागमनसंभवंतीतिसंभवाः

संभूताःपचाद्यच्॥मुदःसंतोषाःनेममुः॥अतिरिच्यंतेस्मइत्यर्थः॥चतुर्दशभुवनभरणप

माघटि० १६ र्थमिव पुष्यंतर्नमंतीति कविप्रौढोक्तिः सिद्धातिशयेन स्वतःसिद्धस्याभेदेनाध्यवसितत्वादति स० १
शयोक्तिः सा च मुदमंतः संवेष्टा कथं संबंधे संबंधरूपातिशयाद्यो त्या सापेक्षा ॥२३॥ ॥
निदाघेति ॥ निदाघयुक्तं धाम यस्य तं तथोक्तं ॥ निदाघो ग्रीष्मकाले स्यादुष्णस्वेदांबुनोरपीति
विश्वः ॥ अर्कमिवाधिदीधितिमधिकतेजसं मुनिमभिलक्ष्य ॥ अभिरभागे इति लक्षणे कर्म
प्रवचनीयसंज्ञा कर्मप्रवचनीययोगे द्वितीया मुदा विकासमुपेयुषी उपगते कुसुमस्य

निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी ॥ वि
लोचने बिभ्रदधिश्रितश्रिणी स पुंडरीकाक्ष इति स्फुटोऽभवत् ॥२४॥

तो निपातः ॥ अत एव अधिश्रिता प्राप्ता श्रीर्याभ्यां ते तथोक्ते इति विविक्तावितिनुमागमः ॥
विलोचने बिभ्रत् ॥ नाभ्यस्ताच्छतुरिति नुमभावः ॥ हरिः पुंडरीकाक्ष इत्येवं स्फुटोऽभवत् ॥ सू १६
र्यसंनिधाने श्रीविकाशसंभवत्वेन पुंडरीकसाधर्म्यात् पुंडरीके इव अक्षिणी यस्येत्येव
यथार्थलाभे पुंडरीकाक्ष इति व्यक्तमन्वर्थसंज्ञोऽभूदित्यर्थः ॥ विकाशे तत्स्फुटोऽभवदिति पदा
र्थहेतुकस्य काव्यलिंगस्य निदाघधामानमिवेत्युपमापेक्षत्वादनयोरंगांगिभावेन संकरः ॥२४॥

सितमिति ॥ अथोभयोरुपवेशानंतरमच्युतो हेतुकर्त्ता विसारिभिरभीक्ष्णं प्रसरद्भिः बहुल
माभीक्ष्ण्ये णिनिः ॥ द्विजावलिर्दंतपंक्तिः ॥ दंतविप्रांडजा द्विजा इत्यमरः ॥ सैव व्याजः कपटं यस्य
स तद्रूप इत्यर्थः ॥ स चासौ निशाकरश्च तस्यांशुभिः किरणैः ॥ सितं स्वभावशुभ्रं मुनेर्वपुः
सौधं प्रासादमिव सुतरां समस्तं अव्ययादाम् प्रत्ययः सितिम्ना धावल्येन प्रयोज्यकर्त्रा
लंभयन् प्रापयन् ॥ अतिधवलयन्नित्यर्थः ॥ लभेश्च गत्युपसर्जनप्राप्त्यर्थत्वेन अगत्य

सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लंभयन् ॥ द्विजा
वलिव्याजनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः ॥२५॥ व

र्थत्वेन अगत्यर्थत्वात् कुतिबुधि स्यादिना अणौ कर्तुः कर्मत्वाकर्मत्वाकर्मत्वे इति ॥ प्राप्तः सर्दुना
गमर्थहेतुकर्मत्वमेवेति रहस्यं ॥ गतिश्चेतिनुगागमः ॥ शुचिस्मितां वोचत उक्तवान् ॥
स्मितपूर्वमभिभाषि च राघव इति न्यायादिति भावः ॥ ब्रुवो वचिर्लुङ् ॥ वच उमित्युमा
गमेगुणः ॥ अत्र सौधमिवेत्युपमायाः सितिम्ना लंभयन्निति संबंधरूपातिशयोक्तिः ॥

हि जावलिव्याजनिशाकरेति छलादिशब्दैरसत्यत्वप्रतिपादनरूपापन्हुत्यस्य च मिथोनि
रपेक्षत्वात्संसृष्टिः॥२५॥ हरतीति॥ भवदीयदर्शनं शरीरभाजां द्रष्टृणामित्यर्थः॥ भक्तो
ण्विः॥ कालत्रितयेपि भूतादिकालत्रयेपि योग्यतां पवित्रतां व्यनक्ति गमयति॥ कु

हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः॥ शरीर
भाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां॥ २६॥

तः संप्रति दर्शनकाले अघं हरति॥ एष्यतो भाविनः शुभस्य श्रेयसो हेतुः॥ तथा
पूर्वाचारितैः प्रागनुष्ठितैः सुकृतैः॥ कृतं॥ एवं त्रैकाल्येपि स्वकार्यत्वेन कारण
त्वेन च पुंसि सुकृतसमवायमवगमयत्ते दर्शनं कस्य न श्लाघ्यमिति भावः॥ १७
अत्र हरतीत्यादिवाक्यार्थस्य शरीरेत्यादिवाक्यार्थस्य हेतुत्वोक्त्या वाक्यार्थहेतु
काव्यलिंगमलंकारः॥ २६॥ ॥ ॥ ॥

जगतीति॥ जगत्सु पर्याप्ता अपरिच्छिन्नाः सहस्रं भानवो रश्मयो यस्य तेन भानुनार्केण॥
भानवोर्ककरांशवः इत्यमरः॥ अत्रापि वैजयंती॥ यत्तमो नियंतुं निवारयितुं न समभा
वि न शेके॥ भावेलुङ्॥ अविद्यमानमुत्तमं यस्मात्तदनुत्तमं सर्वाधिकं॥ अदस्तमो

जगत्यपर्याप्तसहस्रभानुना न यन्नियंतुं समभावि भानुना॥ प्रस
ह्य तेजोभि रसंख्यतां गतैरदस्त्वयानुन्नमनुत्तमं तमः॥ २७॥

मोहात्मकमसंख्यतां गतैः तेजोभिः प्रसह्य बलात्त्वया नुन्नं॥ अतः श्लाघ्यदर्श
नो भवानिति भावः॥ नुद विदेत्यादिना विकल्पान्निष्ठानत्वं॥ अत्रोपमानाद्भा
नोर्मुनेराधिक्यकथनाद्व्यतिरेकः॥ २७॥ ॥ ॥

माघटि. कृत इति॥ प्रजानां जनानां अयस्थानां च क्षेमकृता कुशलकारिणा प्रजास्रष्टा संततो जन
१८ इत्यमरः॥ सुपात्रे योग्यपुरुषे करशादिहट भाजने च निक्षेपे निधाने न निराकुला
त्मना स्वस्थचित्तेन च योग्यभाजनयोः पात्रमित्यमरः॥ प्रजासृजा ब्रह्मणा पुण्णा
च त्वं धनसंपदामिव श्रुतीनां वेदानां स्वयोपयोगे दानभोगाभ्यां व्ययेप्यक्षयः॥ एक

कृतः प्रजाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना॥ स
दोपयोगेपि गुरुस्त्वमक्षयो निधिः श्रुतीनां धनसंपदामिव॥२८॥

त्राम्नायत्वादन्यत्रानंसा चेति भावः॥ गुरुरुपदेष्टा संप्रदायप्रवर्त्तक इति यावत्॥ अ
न्यत्र महान् निधीयंतेस्मिन्नेति निधिर्निक्षेपः कृतः॥ उपसर्गे घोः किः॥ श्रुतिसंप्रदा १८
यद्वारा धर्माधर्मव्यवस्थापकतया जगत्प्रतिष्ठाहेतूनां भवादृशां दर्शनं कस्य न श्ला
घ्यामिति भावः॥ अत्र [illegible]मात्रसाधर्म्यान्न श्लेषोयं प्रकृताप्रकृतविषय इत्याहु॥२८॥

विलोकनेनेति॥ हे मुने निबर्हितांहसा अपहृतपापेन॥ अत एवामुना तव विलोकनेनैव
कृतार्थः कृतोस्मि॥ तथाप्यहं गरीयसीः श्रेष्ठतरा॥ द्विवचनविभज्ये त्यादिना ईयसुन्॥
उगितश्चेति ङीप्॥ प्रियस्थिरेत्यादिना गुरोर्गरादेशः॥ गिरस्तव वाचोपि शुश्रूषुः॥ श्रोतु

विलोकनेनैव तवामुना मुने कृतः कृतार्थोस्मि निबर्हितांहसा॥ तथा
पि शुश्रूषुरहं गरीयसीर्गिरोथवा श्रेयसि केन तृप्यते॥२९॥ ॥

मिच्छुरस्मि॥ शृणोतेः सनंतादुप्रत्ययः॥ न चैतद्वृथेत्याह॥ न चैतद्वृथ वा तथा हीस
र्थः॥ अथवेति पक्षांतरप्रसिध्योरिति गणव्याख्याने॥ श्रेयसि विषये केन तृप्यते न
केनापीत्यर्थः॥ कृतार्थतायाश्च तत्राभावादिति भावः॥ भावे लट्॥२९॥ ॥
एवं प्रियमुक्त्वा संभ्रमानगमनप्रयोजनं विनयेन पृच्छति॥ गतस्पृहोपीति॥ ॥

गतस्पृहोऽपि विरक्तोऽपि त्वमागमनप्रयोजनं वदेति वक्तुं यथा दृष्टतया व्यवसीयते उ
द्युज्यते॥ स्यतेर्भावे ल्लट्॥ उदितमुत्पन्नं उत्कं वा तन्मनो मम गौरवं येन सः गुरुः श्ला
घ्यः एषा त्वयैवागमः एव नोऽस्माकं धृष्टतां तनोतीति॥ भवतो निस्पृहस्यापि मम
प्रेक्षावत्त्वं च नेः प्रयोजनव्याख्यासावकाशः प्रश्न इति भावः॥३०॥ इतीति॥ इ
ति ब्रुवंतं हरिं स व्रती मुनिरुवाच॥ किमिति तेन हे पुरुषोत्तम पुरुषश्रेष्ठ॥

गतस्पृहोऽप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते यथा॥ तनोति न
स्तां मुदितैर्मनोगौरवो गुरुस्त्वयैवागम एष धृष्टताम्॥३०॥ इति ब्रुवंतं तमुवाच ना
स व्रती न वाच्यमित्थं पुरुषोत्तम त्वया॥ त्वमेव साक्षात्करणीय इत्यतः कि
मस्ति कार्यं गुरु योगिनामपि॥३१॥

न निर्धारणे इति षष्ठीसमासनिषेधः॥ त्व १९
याद्यं योगिनामपि त्वमेव साक्षात्करणीयः प्रत्यक्षः कर्तव्यः॥ इत्यतोऽस्मादन्यत् गुरु
कार्यं किमस्ति॥ न किंचिदित्यर्थः॥ तस्मान्न प्रयोजनांतरप्रश्नावकाश इति भावः॥३१॥

यदुक्तं योगिनामपि त्वमेव साक्षात्करणीय इति तद्दर्शयति॥ उदीर्णरागेति॥ उदीर्ण उद्रि
क्तो रागो विषयाभिलाषः स एव प्रतिरोधकः प्रतिबंधकः॥ पादचारश्च यस्मिन् तं॥
प्रतिरोधकः परास्कंदी पाटच्चरमलिम्लुचादयः समः॥ अभीक्ष्णमक्षुण्णतया अनभ्य
स्तत्वेनाप्रतिहतत्वेन च जनैरतिदुर्गमं मोक्षपथमपवर्गमार्गकांतारं चोपेयुषः प्राप्त
वतः उपेयिवाननाश्वाननूचानश्चेति क्वसंतो निपातः॥ मनस्विनः सुमनसः धीरस्य च

उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमम्॥ ॥
उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया॥३२॥

प्रशंसायां विनिः॥ त्वमेव निरपायः पुनरावृत्तिरहितः संश्रयः प्राप्तिर्यस्याः सा तथोक्ता॥
न स पुनरावर्तत इति श्रुतेः अग्रभूमिः प्राप्यस्थानं॥ अग्रमालंबने प्राप्य इति विश्वः॥ सो
ऽहमस्मीत्यादिश्रुतेस्त्वत्प्राप्तेरेव मोक्षत्वादिति भावः॥ तस्मान्मुमुक्षूणामपि साक्षात्करणी
यस्त्वमेवेति प्रसिद्धं तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय इति श्रुतेः॥

यथा कस्यचित्कुतश्चित्संकटान्निर्गमस्य केनचित्कांतारं गतस्य किंचि
न्निर्बाधस्थानप्राप्तिरभयाय कल्पते तथा त्वमपि मुमुक्षोरिति ध्वनिः॥ ३२॥
ननु प्रकृतिविविक्तपुरुषसाक्षात्कारान्मोक्षो नास्मत्साक्षात्कारादित्याशंक्य
सोपि त्वमेवेत्याह॥ उदासितारमिति॥ पुराविदः पूर्वज्ञाः कपिलादयः॥ त्वां नि
गृहीतमानसैरंतर्निबद्धचित्तैर्योगिभिः आत्मनि अधि इति अध्यात्मं विभ
क्त्यर्थेऽव्ययीभावः॥ अनश्चेति समासांतष्टच्॥ अध्यात्मं दृक् ज्ञानं तया अ
ध्यात्मदृशा प्रसादृशा कथंचन गृहीतं साक्षात्कृतं॥ केन रूपेण गृहीतमित्य
त आह॥ उदासितारं उदासीनं॥ प्रकृतौ स्वार्थप्रवृत्तायामपि स्वयमप्रव २०
र्त्तत्वादस्पृष्टमित्यर्थः॥ आसिस्तृच्॥ विकारिभ्यो बहिः बहिर्विकारं महदादि
भ्यः पृथग्भूतमित्यर्थः॥ अपपरिबहिरंचवः पंचम्येत्यव्ययीभावः॥ किंच॥

प्रकृतेरन्ये गुणात्मनो मूलकारणात्पृथग्भिन्नं॥ प्रकृतिः पंचभूतेषु प्रधाने मूलकार
ण इति यादवः॥ पुराभवं पुरातनं॥ अनादि॥ सायंचिरमित्यादिना ट्युप्रत्ययः॥ पुरुषं
पुरुषपदवाच्यं विज्ञानघनं विदुर्वदंति॥ विदो लटो वेत्युसादेशः॥ यथाहुः॥ मूल
प्रकृतिरविकृतिर्महदाद्याः॥ प्रकृतिविकृतयः सप्त॥ षोडशकस्तु विकारो न प्रकृ

उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन॥ बहि
र्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः॥ ३३॥

तिर्न विकृतिः पुरुष इति॥ अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतेश्च सोपि
त्वमेव तत्त्वमस्यादिवाक्यैरैक्यश्रवणात्॥ तस्मात्त्वमेव साक्षात्करणीय इति सू
थूक्ष्ममिति भावः॥ एवं भगवतो निर्गुणस्वरूपमुक्त्वा संप्रति प्रस्तुतोपयोगितया
सगुणमाश्रित्य षड्भिः स्तौति॥ ३३॥ छ ॥ छ ॥ छ ॥

स॰ १

माघटि॰ २३ निवेशयामासि सीथ्येति ॥ जगत्त्रयस्य एकस्य पतिः एकस्मिन्स्वीच ॥ स्थपतिरधिप
तौ लिलिक्षिन्बृहस्पतिसौचीवर्त्त्मोरिति वैजयंती ॥ हेलया ध्वृतवराहावतारेणे
तिभावः ॥ फणभृतामोकसः अश्रयस्य भवनस्य ॥ ओकः सद्मनि चाश्रय इति विश्वः ॥

निवेशयामासिथ हेलयोध्धृतं फणाभृतां छादनमेकमोकसः ॥ ज
गत्त्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तंभशिरस्सु भूतलं ॥ ३४ ॥

एकं आच्छादनमावरणं भूतलं उच्चकैरुन्नतेषु अहीश्वरः शेष एव स्तंभस्तस्य शिरस्सु मू
र्धसु अग्रेषु च सह स्थापीतिभावः ॥ निवेशयामासिथेति हितवानसि ॥ विशतेर्णयंता ल्लिं
टि थलि ॥ कृञ् चानुप्रयुज्यते ॥ लिटि सर्वे रनुप्रयोगः ॥ अत्र श्लिष्टाश्लिष्ट रूपकयो
र्हेतुमभावात् श्लिष्टपरंपरितरूपक ॥ ३४ ॥ २३

अनन्येति ॥ न विद्यते अन्यो गुरुर्यस्यास्तस्या अनन्यगुर्व्यगुर्व्या इत्यनीकारांतः पाठः समासात्
प्रागीकारेन ध्वृतश्चोतिकः प्रत्ययः प्रसंगः ॥ पश्चादनुपसर्जनादुकारांताधातोगुणवचना
दितिन प्राप्नोति ॥ ङितिहूस्वश्चेति वा नदीत्वात् णइस्य डागमः ॥ केचित्तु समासांतो विधिरनि
त्य इति कथंचित्साधयंति ॥ तस्याः सर्वोत्तरायास्तव पुराणमूर्त्तेः केवलं अमानुषरूपस्यैवा
केवलं रूपमेकस्यात्केवलस्त्वावधारण इति शाश्वतः ॥ महिमा केनावगम्यते न केनापीत्य

अनन्यगुर्व्यास्तव केन केवलं पुराणमूर्त्तेर्महिमावगम्यते ॥ मनुष्यजन्मा
सुरा पि सुरान् गुणैर्भवान्भवोच्छेदकरैः करोत्यधः ॥ ३५ ॥ ॥ ॥

र्थः ॥ कुतः मनुष्या जन्म यस्य स मनुष्यजन्मापि भवान् ॥ अवयवो बहुव्रीहि व्यधिकरणो ज
न्माद्युत्तरपद इति वामनः ॥ भवोच्छेदकरैः संसारनिवर्तकैर्गुणैर्ज्ञानादिभिः सुरासुरान् ॥
सुरासुरविरोधस्य कार्योपाधिकत्वेन शाश्वतिकत्वाद्येषां च विरोधः शाश्वतिक इति न
द्वंद्वैकवद्भावः ॥ अधः करोतीति ॥ शेषे प्रथम इति प्रथमपुरुषः ॥ भवच्छब्दस्य युष्मदर्थत्वेन
शेषत्वादिति ॥ मानुष एव ते महिमा दुरवगाहः ॥ अमानुषस्तु किमिति तात्पर्यार्थः ॥ द्वितीयार्थे सके

[illegible] ॥ ३५ ॥

स·१

माघटि· २२

लघूकरिष्यन्निति॥ त्वमतिभारेण दुर्जनस्वरूपेण भंगुरां स्वयं भज्यमानां॥ भंजभासमि
दो घुरच् भिदुरादयः कर्मकर्तरि इति वामनः॥ अमूं भवमित्यर्थः॥ लघूकरिष्यन् निर्भ
राकरिष्यन् किल अभूततद्भावे इति च्विः॥ द्यौदिवेति दीर्घरतीयाद्यौस्त्रिदिवः स्वर्ग
स्तस्मात्॥ घञर्थे कविधानवृत्तिविषये संख्याशब्दस्य पूर्णार्थत्वं॥ त्रिभागादिव

लघूकरिष्यन्नतिभारभंगुराममूं किल त्वं त्रिदिवादवातरः॥ उदु
ढलोकत्रितयेन सांप्रतं गुरुर्धरित्री क्रियतेतरां त्वया॥ ३६॥

त॥ अवतारः अवतीर्णोसि॥ सांप्रतं संप्रति॥ उदूढलोकत्रितयेन॥ कुक्षाविति शेषः त्व २२
या धरित्री॥ गुरुः पूज्या भारवती च क्रियतेतरां॥ अतिशयेन क्रियतेति तिङश्चेति तरप्
किमित्तिङ्व्ययाद्याम्प्रकर्ष इत्याम्प्रत्ययः॥ लघुकर्त्ता स गुरुकर्त्रेति विरोधाभासो
लंकारः॥ आभासत्वे विरोधाभास उच्यते इति लक्षणात्॥ ३६॥

निजौजसेति॥ निजौजसा स्वतेजसा जगद्भ्यो द्रुह्यंतीति ते जगद्द्रुहः॥ कंसादयः सत्सुद्वि
षेत्यादिना क्विप्॥ तेषामुज्जासयितुं तान्निहंतुमित्यर्थः॥ जासिनिप्रहणेत्यादिना
कर्मणि शेषे षष्ठी॥ जसु हिंसायामिति चौरादयः॥ महीतलं नोपाजिहीथाः यदि ना
वतरश्चेत्॥ ओहाङ् गतौ लिटि थास्॥ ततस्तर्हि समाहितैः समाधिनिष्ठैरपि सक

निजौजसोज्जासयितुं जगद्द्रुहामुपाजिहीथा न महीतलं यदि॥ ॥
समाहितैरप्यनिरूपितस्ततः पदं दृशः स्याः कथमीश मादृशां॥ ३७॥

र्मकादप्यानिरूपितादिवदविवक्षिते कर्मणि कर्तरि क्तः॥ अथवा समाहितचित्तैः
र्विभक्तेषु विभक्ताभ्रातर इतिवदुत्तरपदलोपो द्रष्टव्यः॥ गम्यमानार्थस्या
प्रयोग एव लोप इति कैयटः॥ अनिरूपितो अगृहीतोपि त्वं हे ईश मादृशां चर्मचक्षुषा
मितिभावः॥ विनयोक्तिरियं दृष्टेः पदं गोचरः कथं स्याः न कथंचिदित्यर्थः॥ तस्मा
त्वत्साक्षात्कारण॥ वागमनप्रयोजनमितिभावः॥ ३७॥

 

ननु कोसौ निर्बंधो यन्ममैवायं दुष्टनिग्रहाधिकार इत्याशंक्यानन्यसाध्यत्वादित्याह॥ उ
पप्लुतमिति॥ विश्वं बिभर्त्तीति विश्वंभरस्तत्संबुधौ हे विश्वंभर विश्वत्रात॥ मदो
द्धतैः कंसादिभिरुपप्लुतं पीडितम
ज्जित्यादिनारवरप्रत्ययेनुमागमः॥ मदोद्धतैः कंसादिभिरुपप्लुतं पीडितम
दो विश्वं पातुं त्वमेव ईशिषे शक्तोसि विश्वंभरत्वादिति भावः॥ ईश ऐश्वर्ये लटि था
सि रूपं॥ अत्रैव धर्म्मेण दृष्टांतमाह॥ क्षपायास्तन स्कांडेस्तमोवर्गः कांडोस्त्री दंड

उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वंभर विश्वमीशिषे॥ ऋतेर
वेः क्षालयितुं क्षमेत कः क्षपातमस्कांडमलीमसं नभः॥२९॥

बाणार्गवर्गावसरवारिष्वित्यमरः॥ तमस्कादिषु चेति विसर्जनीयस्य सत्वं॥ मली
मसं मलिनं॥ मलिनं॥ मलिमसं तु मलिनं कच्चरं मलदूषितमित्यमरः॥ ज्योत्स्नात
मिस्रेत्यादिना मत्वर्थीयो निपातः॥ क्षालयितुं रवेः ऋते रविं विना अन्यारादित
रर्ते इति पंचमी॥ क्षमेत शक्नुयात्॥ न कोपीत्यर्थः॥ अत्र वाक्यद्वये समानधर्मस्यैक 23

शेषक्षमेतेति शब्दद्वयेन वस्तुप्रतिवस्तुभावेन निर्देशात् तत्रापि व्यतिरेकमुखत्वाद्वैध
र्म्येण प्रतिवस्तूपमालंकारः॥ तदुक्तं॥ सर्वेस्वे॥ वा[illegible] क्यार्थगत्वेन समानस्य वाक्य
द्वयेपि पृथक् निर्देशः प्रतिवस्तूपमा॥३०॥ करोतीति॥ किं च जनो मृगाणामिव कंसादि
महीभृतां वधाद्धेतोस्तव स्तवं स्तोत्रं॥ स्तवः स्तोत्रं नुतिः स्तुतिरित्यमरः॥ करोतीति यत् हे ह
रे कृष्ण सिंहेति वा गम्यते॥ सा स्तुतिः तिरस्क्रिया हिरण्याक्षपुरःसरा॥ हिरण्याक्षप्रभृतयो ये

करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवं॥ ह
रेर्हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रत्युत सा तिरस्क्रिया॥३०॥

सुरास्त एव द्विपास्तेषां द्विषः हंतुरित्यर्थः॥ तव प्रत्युत वैपरीत्येन॥ प्रत्युतेत्युक्तं वैपरी
त्य इति गणव्याख्याने तिरस्क्रिया अपमानः॥ यदि सामान्येन नपुंसकं स्यादिति विधेयलिं
गं॥ गजघातिनः सिंहस्य मृगवधवर्णनमिव महासुरहंतुस्तव कंसादिक्षुद्रनृपवधो
द्घाटनं तिरस्कार एवेत्यर्थः॥ अत्रासुरद्विपानां हरेरेव हरेरिति श्लिष्टपरंपरितरूपकं
मृगाणामिवेत्युपमया अंगांगिभावेन संकीर्त्यते॥२९॥

एवं स्तुत्वा देवर्षिमभिमुखीकृत्यागमनप्रयोजनं वक्तुमुपोद्घातयति॥ प्रवृत्त इति॥ त्वं उज्झि
तश्रमस्त्यक्तश्रमः सन्॥ क्रमेण भुवनानि द्विषंतीति भुवनद्विषः दुष्टास्तेषां पेष्टुं तान्हिं
सितुमित्यर्थः॥ जासिनिप्रहणनाटक्राथपिषां हिंसायामिति कर्मणि षष्ठी॥ स्वयमप
रप्रेरित एव प्रवृत्तोसि एवं तर्हि विष्टपेषणता मा कारीति चेत्तत्राह॥ तथापि स्वतः प्र

प्रवृत्त एव स्वयमुज्झितश्रमः क्रमेण पेष्टुं भुवनद्विषामसि॥ तथा
पि वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुपं मनः॥ ४०॥

वृत्तोपि मिथो रहसि त्वदाभाषणे त्वया सह संलापे लोलुपं लुब्धं॥ लुब्धोभिलाषुकः
तृष्णक् समौ लोलुपलोलुभौ चेत्यमरः॥ मे मनो मां वाचालतया सह युनक्ति वाचा
लं करोतीत्यर्थः॥ वाचो लब्धोस्य संतीति वाचालः॥ आलजाटचौ बहुभाषिणि
सालच्॥ स्याज्जल्पाकस्तु वाचालो बहुगर्ह्यवागित्यमरः॥ ४०॥ ७ ॥ ८ ॥



अथ स्वनाक्यश्रवणं संदिदुर्क प्रार्थयते॥ तदिति॥ तत्तस्मादिंद्रमुपगत उपेंद्रः इंद्रावरज॥
अतएव इंद्रसंदिष्टं श्रोतव्यमिति भावः॥ किंच विश्वस्मै जनाय हितं विश्वजनीनं॥
आत्मन्विश्वजनभोगोत्तरपदात्खः॥ यद्वचः॥ क्षणं न तु चिरं मयोच्यते तद्वचः॥ अहि
द्विषः वृत्रघ्नः॥ सर्प्पे वृत्रासुरेप्यहिरिति वैजयंती॥ समस्तकार्येषु धुर्यत्वं गतेन॥

तदिंद्रसंदिष्टमुपेंद्र यद्वचः क्षणं मया विश्वजनीनमुच्यते॥ समस्त
कार्येषु गतेन धुर्यतामहिद्विषस्तद्भवता निशम्यतां॥ ४१॥

अतोपि भवता निशम्यतां॥ प्रार्थनायां लोट्॥ धुरं वहतीति धुर्यः॥ धुरो यड्ढकाविति
यत्प्रत्ययः॥ स्फुटमत्र पदार्थहेतुकं काव्यलिंगमलंकारः॥ ४१॥ अथाशिशुपालो हं
तव्य इति वक्तुं तस्यावश्यवध्यत्वेनिसवध्यत्वज्ञापनोपायिकतया अर्धसप्रकटनार्थं
जन्मांतरवृत्तांतं तावदुद्घाटयति॥ अभूदिति॥ प्रतिपक्षाछत्रो जन्मयासांतानसंगिया

माघटि·
२५

मभूमिरविषयः॥नीभीकइत्यर्थः॥तपनद्युतिः सूर्यप्रतापोदितेस्तनूजोदैत्यो।भूत्॥कोसावत आह॥ ...मदरेरिंद्रस्येंद्रशब्दार्थनिषूदनं इंद्रतिइंद्रः इदिपरमैश्वर्येहरेरिंद्रस्यादिनाऽरप्रत्या दिनाऽरप्रत्ययांतोरुणादिकोनिपातः॥तस्येंद्रशब्दस्येंद्रइतिसंज्ञापदस्ययोर्थः॥परमै श्वर्यलक्षणः॥तस्यनिषूदनंनिवर्त्तकंकर्त्तरिल्युट्॥हरेरैश्वर्यल...ः॥हर्ता रमित्यर्थः॥यंदैत्यंहिरण्यशब्दपूर्वकंकशिपुंप्रचक्षते हिरण्यकशिपुमित्यर्थः॥प्रच

अभूदभूमिः प्रतिपक्षजन्मनां भियां तनुजस्तपनद्युतिर्दितेः॥ यमिं
द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते॥४२॥ ॥

क्षते॥अत्रहिरण्यशब्दपूर्वकत्वंकशिपुशब्दस्यैवनतुसंज्ञिनस्तदर्थस्यइतिशब्दपर स्यकशिपुशब्दार्थस्यार्थगतेनाप्रयोज्यस्यप्रयोज्यस्यप्रयोगात्॥अवाच्यवचनाख्यं दावमाहुः॥पदवाच्यवचनएवंविधविषयेशब्दपरेणार्थलक्षणयेतियथाकथंचित्सं पाद्यमित्युक्तमस्माभिर्दिवपूर्वगिरिमिति॥पदानुरूपपदप्रसंगेवदमभ्यादिदेशेसेतद्याख्या नावसरेसंज्ञिविन्यासंघटायथेच्चविशेषव्याख्यायंदैत्यमुपदिश्यहिरण्यशब्दपूर्वककशिपुंप्रच [illegible]

समत्सरेणेति॥समत्सरेणसवैरेण॥असुरतीत्यसुरः॥ असेरुरन्॥असुरइतिनाम्नः॥ चिरायचिरकालेन॥चिरायचिररात्रायचिररात्रायचिरस्याद्याश्चिरार्थकाइत्यम रः॥प्रथमाभिधेयतां॥उपेयुषाअन्वर्थतयामुख्यार्थतांगतेनतत्पश्चिनाबलव

समत्सरेणासुर इत्युपेयुषा चिराय नाम्नः प्रथमाभिधेयतां॥ भ
यस्य पूर्वावतरस्तरस्विना मनस्सु येन द्युसदां न्यधीयत॥४३॥

ता॥तत्सबिलंरंहसीतिविग्रहः॥ये नहिरण्यकशिपुनादिविसीदंतीतिद्यु सदांदेवानांमनस्सुभयस्यपूर्वावतरः प्रथमप्रवेशः॥अवतारः॥न्यधीयतनि हितः॥धायःकर्मणिलुङ्॥अस्मादेवदेवीनांभयस्योत्पत्तिरभूदित्यर्थः॥४३॥ ५॥ द

माघटी.
२६

दिशामिति॥ श्रियः संपदः यतोयदेत्यर्थः॥ दिशामधीशान् दिक्पतीन्॥ अपि चतुरः सुरान्
इंद्रयमवरुणकुबेरान्॥ अपास्य विहाय तं हिरण्यकशिपुं रागहृताः रागाकृष्टाः सत्यः॥
न तु बलादिति भावः॥ सिषेविरे॥ यतो वीरप्रिया श्रिय इति भावः॥ ततः आरभ्य तदाप्र

दिशामधीशांश्चतुरो यतः सुरानपास्य तं रागहृताः सिषेविरे॥
अवापुरारभ्य ततश्चला इति प्रवादमुच्चैरयशस्करं श्रियः॥४४॥

भृति॥ अयशः करोतीत्ययशस्करं दुःकीर्त्तिहेतुकमित्यर्थः॥ कृञो हेतुताच्छील्या
नुलोम्येष्विति टप्रत्ययः॥ अतः कमीसादिना विसर्जनीयस्य सत्वं उच्चैः प्रचुरं चला २६
अस्थिरा इति प्रवादं जनवादं अवापुः॥ दिगीशानामपि सर्वस्वहारीति तद्दोषस्य
पराकाष्ठेति भावः॥४४॥

किनां
पुराणीति॥ किं यं नाँ सुराणां गणो यं हिरण्यकशिपुमाशंक्य बाधकत्वेनोत्प्रेक्ष्य स कालः
आदिर्यस्मिन् तत्तदादि तदा प्रभृति स्वरूपशोभैकफलं मुख्यप्रयोजनं येषां पुरादी
नां तानि तथोक्तानि आभीद्दग साध्यत्वात्र बाभावादिति भावः॥ नपुंसकमनपुंसकेनैव
स्यान्यतरस्यामिति नपुंसके कशेषः॥ पुराणि दुर्गाणि प्राकारपरिखादिभिरगम्या

पुराणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कंचुकाः॥ स्व
फला
रूपशोभैकगुणानि नाकिनां गणैस्तमाशंक्य तदादि चक्रिरे॥४५॥

नि॥ चक्रिरे॥ सुदुरेरुपसंख्यानमिति छमेर्दः॥ आयुधं निशातं च चक्रे शोतनुकरण इति
धातोः॥ कृशाचात्रोरन्यतरस्यामिति साविकल्पात्पक्षे आत्वं॥ बलानि सैन्यानि शू
राणि शौर्यवंति चक्रिरे॥ संपादितानि॥ कंचुका वारबाणाः लोहवर्माणीत्यर्थः॥ कंचुको
वारवाणोः स्त्रीत्यमरः॥ घनाः दुर्भेद्याः चक्रिरे इत्थं नित्यं सन्नद्धा जाग्रतीत्यर्थः॥४५॥ ॥

माघटि· २७ सरति॥ अन्येषु भुवनेषु॥ भुवनांतरेषु॥ सुप्सुपेति समासः॥ संचरिष्णुः संचरणशीलः॥ अलं
कृञ्‌ भी स्यादिना चरेरिष्णुच्‌ प्रत्ययः॥ श्रियां आश्रयः॥ हिरण्यकशिपूपर्यन्ददर्यस्वैरेवस्या
यदृच्छास्वैरतेतिरिस्यमरः॥ यांदिशा अशीश्रियत॥ श्रयतेर्लुङ्‌ णिश्रियादिना चिङ्‌ द्विर्भावः॥
इयं इन्द्रदेवाः मुकुटोपलेषु मौलिरत्नेषु स्खलंतः कराः येषां तैः त्रिदशैः बद्धांजलिभिरित्यर्थः॥
उपलः प्रस्तरे रत्ने इति विश्वः॥ त्रिदशाः दशा अवस्था यस्य बाल्यकौमारयौवनानि जन्मसत्ता

स संचरिष्णुर्भुवनांतरेषु यां यदृच्छयाशिश्रियदाश्रयः श्रियां॥ अकारि तस्यै
मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिने नमः॥ ४६॥ ॥

वृद्धयो वा येषां ते त्रिदशाः देवाः यद्वा त्रिभिरधिका त्रिंशत्‌ त्रिदशा इति त्रिदशापरिमाणमेषा
मिति बहुव्रीहिः संख्ययेऽव्ययासन्नादूराधिकसंख्याः संख्येये इति॥ संध्या समाहृता इति त्रिसंध्यं॥ तद्धितार्थेत्या
दिना समाहारे द्विगुः॥ द्विगुरेकवचनं वाटाबंतः इति पक्षे नपुंसकत्वं॥ अत्यंतसंयोगे द्वितीया॥ २७
तस्यै दिने नमः॥ स्यती स्यादिना चतुर्थी॥ नमो नमस्कारः कारि कृञ्‌ ततः कृञ्‌ कर्मणि लुङ्‌॥
चिण्‌ भावकर्मणोरिति विधिः॥ ४६॥ ॥ ॥

अथ सोऽपि पूर्वं वयं वृत्तमस्याह॥ सटाच्छटेति॥ हे नृसिंह इवेत्युपमितसमासः॥ न चासौ सिंहश्चेति
सिंहं प्रस्ताः वानृसिंहः स्यामासिंहीता अननुमनत्यां तनुं कायं बिभ्रतान्नृसिंहावताराभाजा इत्य
र्थः॥ अत एव सटाच्छटाभिः केसरसमूहैर्भिन्नाः घनाः मेघाः येन॥ अभं कर्षविग्रहत्वा
दिति भावः॥ सटाच्छटा केसरयोस्तनुः काये कृशोः त्वचेति विश्वः॥ त्वया सदैत्यः॥ मुग्धा
र्स

सटाच्छटाभिन्नघनेन बिभ्रता नृसिंह सैंहीमतनुं तनुं त्वया॥ स मु
ग्धकांतास्तनसंगभंगुरैरुरोविदारं प्रतिचस्करे नखैः॥ ४७॥

नवो मुग्धः॥ सौम्ये नवे मुढ इति वैजयंती॥ यो कांतास्तनौ तयोः संगेनापि भंगुरैः नखैर
रोविदार्य उरो विदारिणां पारक्यं क्रियमानेति णमुल्‌॥ प्रति चस्करे हृतः॥ किरतेः कर्मणि लि
टे नाच्छदस्यतामिति गुणः॥ हिंसायां प्रतेश्चेति सुडागमः॥ वज्रकठिणोऽपि एवं विधैः न
खैर्विदारितं इत्यसवाङ्मनसगोचरमहिमा स्यैविकमसाध्यमिति भावः॥ ४७॥ ॥

अथास्यानंतरजन्मचेष्टितान्यचेष्टिविनोदमिति॥ अथसहिरण्यकशिपुःपुनर्भूर्वेपि॥ त्रिद
शैः समंसह॥ साकंसार्धंसमंसमंसहेत्यमरः॥ रणेनदर्पादंतःसारात्जन्मयस्याःसातस्याः
कंड्वाःभुजकंडूतेर्विनोदमपनोदमिच्छन॥ प्राग्भवेनरवक्षतेसपदेनादाभावादितिभा
वः॥ दिवःस्वर्गस्यक्षतंरक्षायेनततक्षतरक्षणमित्यर्थः॥ सापेक्षत्वेपिगमकत्वात्स
मासः॥ अनेनदेवसर्वस्यापकारित्वमुक्तं॥ भीषयतइतिभीषणंभनंद्यादित्वाल्ल्युट्प्रत्य

विनोदमिच्छन्नथदर्पजन्मनोरणेनकंड्वास्त्रिदशैःसमंपुनः॥ सरा
वणोनामनिकामभीषणंबभूवरक्षःक्षतरक्षणंदिवः॥४८॥

यः॥ निकामंभीषणंनिकामभीषणं॥ सुप्सुपेतिसमासः रावणानामरावण॥ इतिप्र
सिद्धंरक्षोबभूव॥ राक्षसयोनौजातइत्यर्थः॥ विश्रवसःपसंपुमान्रावणइतिवि २८
ग्रहः॥ तस्यापत्यमितिविश्रवसोविश्रवणावितिप्रकृतेरेवाणादेशः॥ पौराणिकास्तु
रावयतीतिरःवयतीतिरावणइतिव्युत्पादयंति॥ तदुक्तंउत्तरकांडे॥ यस्माल्लोकत्र

यंचैतद्रावितंभयमागतं॥ तस्मात्त्वंरावणेनाम्नावीरोरवत्त्वंभविष्यसीति॥
रोतेर्णर्यतात्कर्तरिल्युट्॥ रावणराक्षसोनियतलिंगत्वाद्विशेषणविशेष्य
भावेपिस्वलिंगता॥४८॥ अथास्योद्धतमप्यश्लोकेनाचष्टे॥ प्रभुरिति॥
योरावणःभुवनत्रयस्यप्रभुःस्वामीबभूषुर्भवितुमिच्छुःभवतेःसनंतादुप्र

प्रभुर्बुभूषुर्भुवनत्रयस्ययःशिरोतिरागाद्दशमंचिकर्तिषुः॥

त्ययः॥ अतिरागात्उत्साहततनतुफलविलंबेनानिर्वेदादितिभावः॥
दशमंशिरःचिकर्तिषुःकर्तितुमिच्छुः कृतीछेदनइतिधातोःसनंतादुप्रत्ययः॥
इष्टसाहसप्रियसाहसअतएवेछासदृशंस्वेछानुरूपपिनाकिनःप्रसादंव
रंविघ्नमिवातर्कयत॥ उत्प्रेक्षितवान्इतिपरस्यरावणोरक्षोनामबभू

माघटि २९ मसाहसिकस्योक्तिः॥ इत आरभ्य श्लोकषट्कं पियकस्य हृस्यस रावणो रक्षो नाम ब स·१
भूवेति पूर्वेणान्वयः॥ रंगेया जस्त्रनचक्रमस्याक्रमताधिकंधरमिति उपरिष्टा
द्वन्वयइत्याह॥ तदसत्॥ गुणानांच परार्थत्वादिति न्यायात्॥ अरुण्यादिव

॥ अतर्कयत् विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः॥४९॥

प्रत्येकं प्रधानानां मिथः संबंधायोगादिसलंत्रार्खाचं क्रमणेन॥ पुराकिल
रावणः काम्यकर्मणि प्रजापतिप्रिणनाय नव शिरांसि अग्नौ हुत्वा दशमारंभस
मये संतुष्टात्तस्मात् त्रैलोक्याधिपत्यं वव्रे इत्युत्तरकांडोक्ता कथा अत्रानुसं २९
धेया॥ ४९॥ ॥

अथ कैलासोत्क्षेपण वृत्तांतमाह॥ समुत्क्षिपन्निति॥ यो रावणः पृथिवीभृतां व
रं कैलासं समुत्क्षिपन् दर्पादित्शेषः॥ शूलिनो वरप्रदानस्य पूर्वोक्तस्य त्रसंत्याः
शैलचलनेन बिभ्यत्यास्तुषाराद्रिसुतायाः॥ पार्वत्याः ससंभ्रमो यो स्वयंग्रहः
प्रियपार्श्वनाविनाकंठग्रहणं॥ सुप्सुपेति समासः॥ तेन आश्लेषस्तेन यत्सु

समुत्क्षिपन्यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः॥ त्रस
त्तुषाराद्रिसुतासंभ्रमस्वयंग्रहाश्लेषसुखेन निःक्रियं॥ ५०॥

खं तेन त्रैलोक्याधिपत्यसुखादुत्कृष्टेनेति भावः॥ निःक्रयं प्रस्कपकार निर्गतं च
कार निःक्रियो गेस्यात् सामर्थ्ये निर्गते चेति वैजयंती॥ यद्वा क्रयणं चकारक्रय
व्यवहारेण यात् गुदैन्यदोषसमाजे सर्थः॥ अत्र सुखवरप्रदानयोर्विनिय
मयात्परिवृत्तिरलंकारः॥ ५०॥ ७ ॥

मा॰टी॰ पुरीति॥ बली बलवान् यो रावणः नमुचिद्विषा इंद्रेण विगृह्य विरुध्य पुरीममराव स॰१
२० तिमवस्कंद्य अवरुध्य नंदनं तद्वनं लुनीहि छिंद्धि॥ इंद्रस्येषारिति इकारः॥ रत्ना
नि श्रेष्ठवस्तूनि मणीन्वा रत्नं श्रेष्ठे मणाविति विश्वः॥ मुषाण मुष स्तेये हलः
श्नः श्नानजाविति श्नानजादेशः अमरांगनाः हर॥ अहार्षीः॥ सर्वत्र पौनःपौन्ये लो
न्वेसर्थः॥ इत्थं अनेन प्रकारेण अहश्च दिवा च अहर्दिवं॥ अहन्यहन्यहनीत्यर्थः॥

पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः॥ विगृ
ह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥५१॥

अचतुरेत्यादिना सप्तम्यर्थे वृत्तौ द्वंद्वसमासांतो निपातः॥ दिवः स्वर्गस्यास्वास्थ्यमु
पद्रवं चक्रे॥ अत्रावस्कंदन्यादौ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमो ३०
रित्यनुवृत्तौ समुच्चयेन्यतरस्यामिति विकल्पेन कालसामान्ये लमात्रादेशो लोट्॥
तस्य तथोपगतं सर्वलिङादेशो हिस्वौ च॥ प्रकरणादिना त्वर्थविशेषावसानं॥ अ

तो हेरिति यथायोग्यं हिलुक्॥ पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः॥ अवस्कं
दनादिक्रियाविशेषाणां समुच्चयः॥ क्रियासमभिहारः॥ तत्सामान्यस्य करोतेः
समुच्चये सामान्यवचनस्येत्यनुप्रयोगश्च कृञ् इति॥ अत्रेदं चित्रात सौशब्द्या
ख्यो गुणः॥ सुपां तिङां च व्युत्पत्तिः सौशब्द्यमिति लक्षणात् समुच्चयश्चालंकारः॥५१॥
सलीलेति॥ संयति युधे समुदायस्त्रियां संयत्समिताजिसमिद्युध इत्यमरः॥ येन रावणे

सलीलयातानि न भर्तुरभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमं॥ अनुद्रुतः
संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रतां॥५२॥ ॥

न अनुद्रुतः अनुधावितः बलस्य शत्रुः इंद्रः अभ्रमोः भर्तुरावणस्य सलीलयातानि
गंभीरगमनानि न प्रशशंस तथा उच्चैःश्रवसः स्वाश्वस्य चित्रं नानाविधं पदक्रमं पदक्षे
पं अर्धपुलायितादिगतिविशेषमित्यर्थः॥ न प्रशशंस॥ किंतु केवलं शीघ्रतां शीघ्रगामि
तामेव प्रशशंस अन्यथा शीघ्रं मां आस्कंद्य गृह्णीयादिति भयादिति भावः॥५२॥ ॥

र॰ घटि॰ ३२

अशक्नुवन्निति॥ अधीरलोचनः अस्थिरदृष्टिः॥ कौशिको महेंद्रः उलूकश्च महेंद्रगुग्गु स॰ १
कोलूकव्यालग्राहेषु कौशिकः इत्यमरः॥ सहस्रकरः सहस्ररश्मिः रविः सूर्यस्येव यस्य रावण
स्य विक्रमकर्मणो दर्शनं सोढुमशक्नुवन्॥ हिमाद्रेर्गुहैव गह्वरं तस्यांतरं प्रविश्य बि
भ्यत्॥ तत्रापि वेपमान एवाबिभ्यतेः शातरिनाभ्यस्तात् तुरिति नुमभावः॥ दिवसानि

अशक्नुवन्सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनं॥ प्रवि
श्य हेमाद्रिगुहागृहांतरं निनाय बिभ्यद्दिवसानि कौशिकः॥५३॥

निनाय॥ घातुकुबेरदिवसवासरा इत्यमरः॥ कौशिक इत्यभिधायाः प्रकृतैकगो ॥३३॥
चरत्वेनोभयश्लोकेपि विशेषणश्लेषासंभवात्॥ उलूकविषयत्वादेव शक्तिमू
लो ध्वनिः॥ सन् सहस्ररश्मेरिव स्वरूपमानिर्वाहकत्वाद्वा असिद्धं गं॥५३॥

बृहच्छिलेति॥ बृहत्यां शिलेव निष्ठुरः कंठे घट्टनात् अभिघाताद्विकीर्णाः विक्षिप्ताः लोलाश्चा
ग्निकणाः स्फुलिंगा यस्य तत्॥ अत एवाप्रसहिष्णु॥ अनभिभाव्यं वा॥ प्रसहनमसहि
ष्णु भवद्गतिवृत्तिकारः॥ अलंकृतीत्यादिना इष्णुच्॥ वैष्णवं चक्रं सुदर्शनं॥ जगत्प्रभोः
सकललोकैकस्वामिनः॥ अस्य सुरद्विषो रावणस्य स्कंधरायां अधि अधिकं

बृहच्छिलानिष्ठुरकंठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः॥ जग
त्प्रभोरप्रसहिष्णु वैष्णवं न चक्रमस्याक्रमताधिकंधरं॥५४॥ ॥

धरं अधिग्रीवं विभक्त्यर्थे अव्ययीभावश्चेति नपुंसकत्वाद्ध्रस्वो नपुंसके
ति प्रातिपदिकस्येति ह्रस्वत्वं॥ कंठो गलोथ ग्रीवायां शिरोधिः कंधरेत्यपी
त्यमरः॥ नाक्रमत॥ अप्रतिहतं नाक्रमत॥ न प्रवर्तते स्म॥ किंतु प्रतिहतमेवे
त्यर्थः॥ वृत्तिसर्गतायनेषु क्रम इति वृत्तावात्मनेपदं॥ वृत्तिरप्रतिबंधः॥५४॥

घटि. विभिन्नेति ॥ स रावणः मदेन दर्पेण दानेन च महोदर्पेन दान योरिति विश्वः ॥ दंतीगजइव स.१
३२ विभिन्नो विपाटितः शंखो निधिर्येषु अथ वः कलुष्य येन सः सन् ॥ शंखो निधौ दंतरेके वौल
लाटास्थि नके पु चेति विश्वः ॥ अकलुषं च स्तुध्यं ॥ आविलं च भवत् ॥ कलुषीभवत् ॥
कलुषीभवत् निरस्तं गांभीर्यं अचिकारित्वमगाधत्वं च यस्य तत् ॥ अपास्तानि पुष्पका
पुष्पाणि पुष्पकं विमानं च यस्मात्तत् ॥ पुष्पपक्षे वैभाषिकः कप्रत्ययः मनुष्यस्येव मनुष्य

विभिन्नशंखः कलुषीभवन्मुहुर्मदेन दंतीव मनुष्यधर्मिणः ॥ निरस्त
गांभीर्यमपास्तपुष्पकं प्रकंपयामास न मानसं न सः ॥ ५५ ॥ ॥

स्येव धर्मः श्मश्रुलोमत्वादिर्यस्येति क्षीरस्वामी ॥ तस्य मनुष्यधर्मणो धनेश्वरस्य ॥ ध
मादिनिचू केवलात् ॥ मानसं चित्तं तदीयसंसश्च ॥ मानसं सरसि स्वांते इति विश्वः ॥ मु ३२
हुः न प्रकंपमानं निवारणाय न अरूहूयामास न क्षोभयामास इति न किंतु प्रकंपयामासैवे
त्यर्थः ॥ कुबेरस्य महामहिमतया संभावनीय कंपत्वनिवारणाय न ग्रहयं ॥ संभाव्य

निषिधनिवर्त्तवेद्वौ प्रतिषेधाविति वामनः ॥ अत्र दंती रावणयोः प्रकृताप्रकृतयोः
श्लेषः ॥ ५५ ॥ रणेष्विति ॥ किंच ॥ रणेषु प्रचेतसा वरुणेन प्रहिताः ॥ मुक्ताः उरगरा
जाः महासर्पास्त एव रज्जव इव उरगराजरज्जवः नागपाशा इत्यर्थः ॥ तस्य रावणस्य सरो
षेण हुंकारेण पराङ्मुखीकृताः ॥ आवर्त्तिताः अत एव सभयोः सद्योजवेन प्रहर्तुः

रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुंकारपराङ्मुखीकृताः ॥
प्रहर्तुरेवोरगराजरज्जवो जवेन कंठं सभयाः प्रपेदिरे ॥ ५६ ॥ ॥

प्रयोक्तुः प्रचेतसः एव कंठं प्रपेदिरे ॥ अत्र परहिंसाप्रयुक्तस्य स्वायुधस्यैव परिस्येन
स्वकंठग्रहणादनर्थोत्पत्तिरूपो विषमालंकारः विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य
चाभवेदिति लक्षणात् ॥ ५६ ॥ ॥ ॥ ॥

माघ॰टी॰ परेतभर्तुरिति॥ अमुना रावणेन धनुः शार्ङ्गं विधातुं निर्मातुं उत्खातं उत्पाटितं स॰१
३३ विषाणयोः मंडलं वलयं यस्य सः परेतभर्तुः प्रेतराजस्य महिषः॥ वाहनभूत
इति भावः भारे विषाणरूपे॥ भग्नेऽप्युद्गमे॥ हृतेपि महतस्त्रपैव भरस्तस्मात्॥
ततोपि दुर्भरादिति भावः॥ भृशो भौवादिकाल्लाहृदोरा विसर्गप्रत्ययः भृशानतं

परेतभर्तुर्महिषोऽमुना धनुर्विधातुमुत्खातविषाणमंडलः॥ ॥
हृतेपि भारे महतस्त्रपाभरादुवाह दुःखेन भृशानतं शिरः॥५७॥

तं शिरः सदा निरंतरं दुःखेन उवाह वहतीस्म॥ असंयोगाल्लिटः कित्त्वाद्
ग्रिस्वपिस्यादिना संप्रसारणं॥ हृतेपि भारेन नतइति विरोधः॥ तदनुप्राणिता ३३
चेयमवनतिहेतुस्साधर्म्यात्त्रपया भारत्वोत्प्रेक्षा॥५७॥ स्पृशन्निति॥
अहः करोतीति अहस्करः सूर्यः दिवादिवादिभ्येसादिना टप्रत्ययः॥ क

स्कंदादिना सत्वं॥ शुचौ समये ग्रीष्मकाले अनुपहताचारे वर्तितोपि शुचिः॥ शुचिः शु
द्धेनुपहते शृंगाराषाढयोरपि ग्रीष्मकृतवहेपि स्यादिति विश्वः॥ समयाः शपथाचा
रकालसिद्धांतसंविदः इत्यमरः॥ असमग्रं यथा तथा पातिभिरसंकुचिद्वृत्तिनिरिसर्थः॥ करा
णां अंशूनां॥ हस्तानां च अग्रैरग्रैः॥ स्वेदोदबिंदवः॥ पयोबलिहस्तांशवः कराः इत्यमरः॥

स्पृशन्सशंकं समये शुचावपि स्थितः करागैरसमग्रपातिभिः॥ अ
घर्मघर्मोदकबिंदुमौक्तिकैरलंचकारास्य वधूरहस्करः॥५८॥

सशंकं स्पृशन्॥ अविश्वासभयादिति भावः॥ अघर्माः अनुष्णाः घर्मोदकबिंद
वः नेत्यादिना विकल्पादुदकशब्दस्योदादेशः॥ तैरेव मौक्तिकैः॥ अस्य वधूरलंचका
र ग्रीष्मेपि तद्भयान्नातप्ततपतीति अर्थः॥ अत्र प्रस्तुतसूर्यविशेषणसाम्यादप्र
स्तुतप्रत्यायकप्रतीतेः समासोक्तिरलंकारः॥५८॥ ॥ ॥

कलासमग्रेणेति॥ कलाभिः षोडशांशैः शिल्पविद्यादिभिश्च समग्रेण संपूर्णेन॥ कला 
शिल्पे च कालेंशे चंद्रांशे कलनेकलेति वैजयंती॥ गृहान मुंचता सदा तद्गृहेष्वेव वसता
तद्भयान्नो वाधर्मस्य चेति भावः॥ मनस्विनीः मानिनीः उत्काः उत्सुकाः कर्तुं उत्कंठ
यितुं॥ उत्कं उन्मना इति निपातात॥ उत्कं करोतीति ण्यंतात्तुमुन्॥ पटीयसा
मानभेदचतुरेणेत्यर्थः॥ कुतः रतिं वितनता विरचयता॥ चांद्रिकाभिश्च तुरोक्तिभिश्च

कलासमग्रेण गृहानमुंचता मनस्विनीरुत्कयितुं पटीयसा॥ वि
लासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेंदुना॥ ५९॥

रागं वर्धयता इंदुना विलासिनो विलसनशीलस्य वौकषलषकत्थस्रंभ इति घिनु 
णप्रत्ययः॥ तस्य रावणस्य नर्मसाचिव्यं क्रीडासंबंधधिकारित्वं॥ चेष्टत्वं॥ क्रीडाली
लाच नर्म चेत्यमरः॥ नाकारीति न किंत्वकार्येवेत्यर्थः॥ अनौचित्यप्राप्तनर्मसाचि
व्यनिषेधनिवारणार्थं नञ्द्वयं॥ संभावनिषेधनिवर्त्तने नञ्द्वयमिति वामनः॥ अ
त्रेंदोः प्रकृतस्याप्रकृतेन नर्मसाचिव्येन श्लेषः॥ ५९॥ ॥ ॥

विदग्धेति॥ मानिना अहंकारिणा अनेन रावणेन विदग्धलीलाश्चतुरविलासिन्य
इत्यर्थः॥ तासामुचिता या दंतपत्रिका विलासिनीविभ्रमदंतपत्रिकेति साधीयान्
पाठः॥ अन्यथा विकृष्टार्थप्रतीतेन क्लिष्टत्वारम्भदोषापत्तेः॥ क्लिष्टं तदर्थावग
तिर्दूराद्यतो भवेदिति लक्षणात॥ विलासिनीनां या विभ्रमार्थानि दंतपत्राणि वि
भ्रमदंतशब्दयोः षष्ठीसमासपर्यवसानात॥ तादर्थ्यलाभः॥ तासां विधित्सया

विलासिनीविभ्रम

विदग्धलीलोचितदंतपत्रीकाविधित्सया नूनमनेन मानिना॥ न जा
तु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति॥ ६०॥ ॥

विधातुमिच्छया॥ विपूर्वाद्दधातेः सनि मिमेत्यादिना इकारः॥ अत्र लोपोभ्यासस्ये
त्यादिना अभ्यासलोपः॥ ततः स्त्रियामप्रत्ययादित्यकारप्रत्ययः॥ नूनं जातु कदा
चिदपि॥ कदाचिज्जातु साधेष्विति अमरः॥ उद्धृतमुत्पाटितं विनायकस्येदं वैनायकं
एकं विषाणं दंतं॥ विषाणं पशुशृंगेस्यात्क्रोडहस्तिदंतयोरिति विश्वः॥ अद्यापि पुनर्न प्ररोह
ति॥ किमन्यदकार्यमस्येति भावः॥ एतेन चान्यथा कथं गजाननस्यैकदंतत्वमुत्प्रेक्षते नूनमिति॥ ६०॥

श्रीघ.टि.
३९

निशांतेति ॥ निशांतं गृहं निशांतं तं गृहं शांतयोरिति विश्वः ॥ तत्रत्या नार्यः शुद्धांतस्त्रिय इ
त्यर्थः ॥ तासां परिधानानि अंतरीयाणि ॥ अंतरीयोपसंव्यानपरिधान्यधोंशुक इत्यम
रः ॥ तेषां धूननं चालनं ॥ धूनोतेर्ण्यंताल्ल्युट् ॥ धूञ्प्रीञोर्नुग्वक्तव्य इति नुक् ॥ तेन स्फुटा
गसापि व्यक्तापराधेनापि ॥ अंतःपुरद्रोहस्य महापराधत्वादिति भावः ॥ ऊरुषु तासां सक्थि
षु लोलचक्षुषः सतृष्णदृष्टेः ॥ सक्थि क्लीबे पुमानूरुः ॥ लोलश्चलसतृष्णयोरित्यमरः ॥

निशांतनारीपरिधानधूननस्फुटागसाप्यूरुषु लोलचक्षुषः ॥ प्रि
येण तस्यानपराधबाधिताः प्रकंपनेनानुचकंपिरे सुराः ॥ ६१ ॥

अत एव तस्य प्रियेण प्रेमास्पदभूतेन अंगीकृताम्लानिर्न दोषायेति न्यायादिति भा
वः ॥ प्रकंपनेन वायुना ॥ अनपराधे अपराधाभावेपि बाधिता राजपुरुषैरिति ३९
शेषः ॥ सुराः अनुचकंपिरे ॥ स्वयमुपायेनांतःप्रविश्यानपराधबाधानिवेदने
न मोचयता वायुना अनुकंपिता इत्यर्थः ॥ एकस्यैव वधे दग्धाद्रुबो जीवंतीति भा
वः ॥ ६१ ॥

तिरस्कृत इति ॥ किंच तस्य रावणस्य जनाभिभाविना लोकतिरस्कारिणा महीय
सामतिमहतां महसां तेजसां महिम्ना महत्त्वेन पृथ्वादिभ्य इमनिज्वा ॥ मुहु
स्तिरस्कृत अत एव तनुः कृशः तनुं न पातयति जाठररूपेण शरीरं धारय
तीति तनूनपात् ॥ अग्निरिति स्वामी नभ्राडादिसूत्रेण निपातनान्नञो नलोपा

तिरस्कृतस्तस्य जनाभिभाविना मुहुर्महिम्ना महसां महीयसां ॥ ब
भार बाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानमाधिजैः ॥ ६२ ॥

भावः ॥ आधिजैः दुःखोत्थैर्बाष्पैर्निश्वासोष्मभिः ॥ बाष्पो नेत्रजलोष्म
णोः ॥ पुंस्याधिर्मानसी व्यथेति विश्वामरौ ॥ द्वौ गुणावावृत्ती यस्य तद्द्विगुणः ॥ तत
श्च्विः ॥ द्विगुणीकृतं द्विरावृत्तं ॥ गुणस्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुष्विति वै
जयंती ॥ धूमवितानं धूममंडलं बभार ॥ अग्निरपि शांतं निघ्नो निस्तेजस्को धू
मायन्नास्त इत्यर्थः ॥ धूमदुःखयोरसंबंधे संबंधाभिधानादतिशयोक्तिः ॥ ६२ ॥

माघटि
३६

स०१

तदीयेति॥ तदीयमातंगानां घटाभिर्व्यूहैर्विघट्टितैरभिहतैः॥ गजानां घटनाघ
टेत्समरः॥ अतएव कटस्थलेभ्यः प्रोषितान्यपगतानि दानवारीणि येषां तैर्गृही
ताः पलाय्य संश्रिता दिशो यैस्तैर्गृहीतदिक्कैः शेषाद्विभाषेति कप्॥ अपुनर्निवर्त्ति
भिर्यातत्रैव स्थितैः दिग्गजैश्चिराय॥ याथार्थ्यं दिक्षु स्थिताः गजा दिग्गजा इ

तदीयमातंगघटाविघट्टितैः कटस्थलप्रोषितदानवारिभिः॥ गृही
तदिक्कैरपुनर्निवर्त्तिभिश्चिराय याथार्थ्यमलंभि दिग्गजैः॥६३॥

त्यनुगतार्थनामकत्वमभिलब्धं॥ लभेर्ण्यंतात्कर्मणि लुङ्॥ विभाषा चिण्मुलो
रिति विकल्पान्नुमागमः॥६३॥ परस्परेति॥ किंच॥ ईर्ष्येदीप्तमुग्रमित्यर्थः॥ धू
महे गुरुर्धिरीप्तोकर्त्तुरिक्तः॥ तं रावणमाराधयितुं सेवितुं परस्परमन्योन्यस्य मर्माणि ३६
रुद्धयानि जीवस्थानानि कुलाचारव्रणानि च आविध्यतिभिनत्तीति मर्माविन्तप
रधाणापहं तेति यावत्॥ विध्यतेः क्विप्॥ ग्रहिज्येत्यादिना संप्रसारणं॥ नहिवृतीत्यादि

नापूर्वस्यादीर्घः॥ तं मर्माविधं निजं स्वीय॥ द्विजिह्वतायां सर्पत्वे यो दोषो दृष्टिविषा
शीविषत्वादिः तं॥ अन्यत्र द्विह्वता पिशुनता॥ द्विजिह्वो सर्पसूचकाविसम
रः॥ सैव दोषस्तमुरुतां सजतां फणिनां संबंधिरभिजिह्मगामिभिः कररचरणादि
मतां विग्रहधारित्वात्॥ अनुगतिभिः अकपटचारिभिश्च॥ तथा कर्णाभ्यां सह
वर्त्तत इति सकर्णानि तैः चक्षुःश्रवत्वविहायाधिःअन्ता करणैरित्यर्थः॥ तेन सहेति

परस्परमर्माविधमुज्झतां निजं द्विजिह्वतादोषमजिह्मगामिभिः॥ त
तुं मिद्धमाराधयितुं सकर्णकैः कुलैर्न भेजे फणिनां भुजंगता॥६४॥

तुल्ययोगे बहुव्रीहिः॥ शेषाद्विभाषेति कप्॥ अन्यत्र कर्णयति सर्वं शृणोतीति
कर्णको नियंता॥ कर्णयतेर्ण्वुल्॥ ततः पूर्ववत्समासे सकर्णकैः सनियामकैरित्य
र्थः॥ कुलैर्वर्गैर्भुजंगता सर्पता विटत्वं च॥ भुजंगो विटसर्पयोरिति हलायुधः॥ न
भेजे स्वक्ता॥ भुजेन गच्छतीति भुजंगमाः॥ गमेः सुपि खोडिच्च॥ तस्मिन्नियंतरि॥

माघ टि.
३८

खलेः खलत्वमिवसर्पे सर्पत्वं विहायार्थं वेषभाषाक्रियाभिः सौम्यत्वं च श्रियत इत्य स.१
र्थः ॥ अत्र प्रस्तुतः सर्पविशेषणसाम्याद प्रस्तुत खल व्यवहार प्रतीतेः समासो
क्तिः ॥ ६४ ॥ ॥ अभीक्ष्णमिति ॥ सहोष्मणा सह स्मरज्वरेणेति ॥ सोष्मण
स्तस्य वपुरभीक्ष्णं भृशमुष्णैरपि ॥ शोकादिति भावः ॥ सुरेंद्रस्य वधो वंदीना

अभीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेंद्रबंदिश्वसितानिलैर्यथा ॥
सचंदनांभःकणकोमलैस्तथा वपुर्जलार्द्रापवनैर्ननिर्ववौ ॥ ६५ ॥

तास्त्रियस्तासां श्वसितानिलैर्निश्वासमारुतैर्यथा निर्वौ ॥ निर्ववार निर्वा
णं निर्वृत्तो मा क्षेतिवेजयंती ॥ तथा सचंदनांभःकणाः चंदनोदकबिंदुसहि
तास्तैश्च तैः कोमलाम्रदुलाश्च ते र्जलार्द्राणां जलोक्षिततालवृंतानां पवने
र्न निर्ववौ ॥ पवित्रं तालवृंतं स्याद्दुत्क्षेपे मजनेत्वतत्त् ॥ जलार्द्रा स्याज्जलेनार्द्रा ३८
मिति वेजयंती ॥ अत्र संततमस्योष्मापचारात्रिर्वृत्तिरिताकारेणविरुद्धयका
र्योत्पत्तिरूपो विषमालंकारः ॥ ६५ ॥ ॥

तपेनेति ॥ सदृतिसंतनतु यथाकालं प्रसूनकॢप्तिं प्रसूनसंपत्तिं ॥ दधतः धारयंतः ॥
तवः वर्षाः प्रावृट् तपेन ग्रीष्मेण ॥ उष्णग्रीष्मागमस्तपे स्त्रियां प्रावृट्स्त्रियो
भूम्नि वर्षा अथ शरत्स्त्रियामित्यमरः ॥ तथा हिमागमः हेमंतः शरदा तथा ॥
ध
शिशिरो वसंतलक्ष्म्या च ॥ सम्मेत्य मिथुनीभावेन मिलित्वा ॥ अस्य रावणस्य पुरे

तपेन वर्षाः शरदा हिमागमो वसंतलक्ष्म्या शिशिरः समेत्य च ॥ प्रसू
नकॢप्तिं दधतः सदर्त्तवः पुरेऽस्य वास्तव्यकुटुंबितां ययुः ॥ ६६ ॥ ॥

वसंतीति वास्तव्याः चिरस्तारः ॥ वसेस्तव्यकर्त्तरिणीति तव्यप्रत्ययो वसि श्वते
च ते कुटुंबिनश्च तत्तां ययुः ॥ समेत्य ययुरिति समुदायसमुदायिनोरभेदविव
क्षया समानकर्त्तृत्वं ॥ अत्र पुरे युगपत्सर्वर्त्तुसंबंधानादसंबंधे संबंधे संबं
धरूपातिशयोक्तिः ॥ ६६ ॥ स चाय मासन्नविनाशात्क्रूरमपि क्रुध्वा पुन

माघटि॰ रत्नयैव हतइतियुग्मेनाह ॥ अमानवमिति ॥ मनोरश्मं मानवः तस्येदमित्यण्प्रत्यये स॰१

३९ पूर्यवसानात् जातिवचनत्वं ॥ अन्यथा मनोर्जाता विशेव स्यात् ॥ अमानवं अमानु

षं ॥ न जायते इत्यजः अतं ॥ अन्येष्वपि दृश्यत इति डः ॥ तथापि मनोः कुले जातं

रामस्वरूपेणोत्पन्नमिति ॥ विरोधः ॥ सचाभासत्वादलंकार इत्याह ॥ प्रभविन

अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमंतमात्मनः ॥ मुमो

चजानन्नपि जानकीं न यः सदाभिमानैकधना हि मानिनः ॥ ६७ ॥

न मिति ॥ महानुभावे तस्मिन्न कश्चिद्विरोध इति भावः ॥ आभीक्ष्णे णिनिरिति

णिनिर्यो मत्वर्थीयः भवंतमिति शेषः ॥ आत्मनोतं नाशकं भाविनं जानन्नपि यो ३९

रावणो जनकस्यापत्यं स्त्री जानकी सीतां न मुमोच ॥ अयुक्तमेतदर्थांतरन्यासेनाच

ष्टे ॥ ज्ञानेप्यमोचने मानित्वं कारणमाह ॥ मानिनः सत्प्राणात्ययेपि अभि

मान एवैकं मुख्यं धनं येषां ते ॥ प्राणात्ययेपि मानं न मुंचंतीत्यर्थः ॥ कारणेन

कार्यसमर्थनरूपोर्थांतरन्यासः ॥ ६७ ॥ ॥

स्मरतीति ॥ भातीति भवान् ॥ भातेर्डवतु ॥ दशरथस्यापत्यं पुमान् दाशरथिः ॥

अतइञ् ॥ भवन् रामसन्नितीत्यर्थः ॥ भवते र्लुङि रात्रादेशः ॥ वनांतात् दंडका

प रण्यात् वनितापहारिणं सीतापहारिणं अमुं रावणं आविद्धानि सेतुबंधादि

भिर्हतानि अतएव चलंति जलानि यस्य स अतएवाविलक्ष्यतं पयोधिं विलंघ्य

स्मर ■ दो दाशरथिर्भवन् भवान् अमुं वनांताद्वनितापहारिणं ॥ पयो

धिमाविद्धचलज्जलाविलं विलंघ्य लंकां निकषा हनिष्यति ॥ ६८ ॥

लंकां निकषा ॥ लंकायाः समीपे ॥ समया निकषा शब्दौ सामीप्ये तदव्ययेम

ताविति हलायुधः ॥ अभितः परितः समया निकषा हान्तृते प्रातियोगेपि

इत्यते इति द्वितीया ॥ हनिष्यति ॥ अवधील् ॥ अभिज्ञावचने लृट् इति भूते लृ

ट् ॥ अहोहननं भवान् स्मरति इति काकुः प्राप्ताभिजानासि किमित्यर्थः ॥ शी

घ्रमथमा ॥ ६८ ॥ ॥

माघटि॰ अथेति॥ अथ रक्षसदेहत्यागानंतरं संप्रति छलनापरोपरः एष रावणः॥ शैलूषो न स॰१
३६ टो भूमिकां रूपांतरमिव॥ शैलूषो नटभिल्लुयोः भूमिका रचनायां स्यान्मूर्त्यंतर
परिग्रह इति विश्वः॥ अपरामुपपत्तिं भवांतरमित्यर्थः॥ अवाप्य शिशुपालसं
ज्ञया तिरोहितात्मा तिरोहितः स्वरूपः स असन् सोपि रावणः सन्नपि परैरितरैः

अथोपपत्तिं छलनापरोपरामवाप्य शैलूष इवैष भूमिकां॥ तिरो
हितात्मा शिशुपालसंज्ञया प्रतीयते संप्रति सोप्यसः परैः॥६९॥

सन्नभवतीति असः तस्मादन्य इव॥ नञ्समासः॥ एतत्तदोः सुलोपोकोरन
ञ्समासे हलीति नञ्समासे सुलोपाभावः प्रतीयते ज्ञायते॥ प्रतिपूर्वादिणः
कर्मणि लट्॥ यथा ए॥ क एव शैलूषो रूपांतरमास्थाय तत्तद्देशभाषादिभिर ३६
न्य इव भातित द्वयमपि मानुषदेहपरिग्रहात् अन्य इवाभाति॥ दौर्जन्यं तु तद्दे
स एव रूपमुपसंहर्य इति भावः॥६९॥

अथास्य दौर्जन्यं त्रिभिराविः करोति॥ स इति॥ सः शिशुपालः बालः सन् वपुषा
चतुर्भुजो भुजचतुष्टयवान् नासीदिति सूचयति ध्वनिः॥ तथा मुखेन पूर्णेंदुनिभ
स्तत्तु त्र्यंत्रिलोचनो लोचनत्रयवानासीत्॥ अंबक इति च ध्वनिः॥ बाल
विशेषणात् संप्रति तत्सर्वमंतमिति भावः॥ संप्रति तु युवा सन् करेण बलि

स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेंदुनिभस्त्रिलोचनः॥
युवा कराक्रांतमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः॥७०॥

ना आक्रांतमहीभृदधिष्ठितराजकः सन् अन्यत्रांशुव्याप्तशैलः॥ बलिह
स्तांशवः करा इत्यमरः॥ उच्चकैस्तेजसा रविरसंशयं संशयो नास्तीत्यर्थः॥
अर्थाभावे अव्ययीभावः॥ वपुषा मुखेनेति च येनांगविकार इति तृतीया॥ हीन
वदाधिक्यस्यापि विकारत्वात् यथाह वामनः॥ हानिवदाधिक्यमप्यंगानां
विकार इति॥ तेजसेति तु प्रकृत्यादिभ्य उपसंख्यानात्तृतीया॥ कराक्रां

माघ टि. ४० लेखादिश्लेषानुमापणितयमुल्लेखस्यारविरहंशायमितितस्यपूर्णेंदुतिभद्रस्फु स.१
यमथासंसृष्टि॥हरिहरादितुल्यमहिमत्वादुर्धर्षेतिभावः॥ ७० ॥ ॥
स्वयमिति॥यदृच्छयास्वेच्छयास्वयंस्वसामर्थ्येननतुदेवताप्रसादबलादिति
भावः॥सुरदैत्यरक्षसां॥देवदानवयातुधानानां अनुग्रहावग्रहयोःप्रसादनिग्र

स्वयंविधातासुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया॥दशान
नादीनभिराद्धदेवतावितीर्णवीर्यातिशयान्हसत्यसौ॥ ७१ ॥ ॥

योर्विधाताकर्ता॥असौशिशुपालः अभिराधाभिराराधिताभिर्देवताभिरी
श्वरादिभिर्वितीर्णोदत्तोवीर्यातिशयोप्रभावातिशयोयेषांतान्दशाननादीन् ४०
हसति॥अनन्यप्रसादलभ्यशक्तेर्मेकथंयाचकतुल्यतेतिगर्वात्प्रहसतीत्यर्थः॥ ७१ ॥
बलेति॥जिगीषुणानिसोत्साहवतेत्यर्थः॥तेनशिशुपालेन बलावलेपात